प्रकाशक:
शेठ श्री. केशवलाल लल्लुभाई झवेरी
ट्रस्टी :
अबालीपोळ जैन उपाश्रय कार्यालय
झवेरीवाड, अमदावाद.

मूल्यम् १-५०

मुद्रक
जयंती दलाल
वसंत प्रीन्टींग प्रेस,
घीकांटा, अमदावाद.

प्रकाशकीय

मुनिराजश्री पूर्णानन्दविजयजी (कुमारश्रमण) अमारी विनंतिथी
चुर्मासमां पर्युषणपर्व निमित्ते आचार्य श्रीकीर्तिसागरसूरीश्वरजी
नी आज्ञाथी झवेरीवाड—आंबली पोळना उपाश्रये रह्या हता.
विद्वत्तापूर्ण व्याख्यानो सांभळीने अमने आनन्द थयो हतो.
प्रसंगे तेमणे आ प्रमाणनयतत्त्वालोक ग्रन्थ फरीथी छपाय तो
-साध्वीसमुदायने अने प्रमाणशास्त्रना विद्यार्थीओने उपयोगी
, ए हेतुथी तेमणे वात करी अने तेमनी वात अमे सहर्ष
लीधी. परिणामे आ ग्रन्थनुं प्रकाशन अमे आंबलीपोळ जैन
श्रयना ज्ञानखाता तरफथी करी शक्या छीए. आ ग्रन्थमां मुनिराज
पूर्णानन्दविजयजीए पहेलेथी छेवट सुधी खूब उत्साह बताव्यो
पं. श्री. अंबालाल प्रेमचंद शाहे प्रुफ रीडींग अने बीजी व्यवस्था
अमने निश्चित बनाव्या छे. पं. श्री. दलसुख मालवणियाए उपोद्घात
ो आपी आ ग्रन्थने शोभाव्यो छे, मुद्रक श्री. जयंती दलाले आ
थने सुन्दर रीते छापी आप्यो छे ते बदल सौनो अमे आभार
नीए छीए. विद्यार्थीओ आ ग्रन्थनो लाभ लेशे तो अमारा सौनो
सार्थक गणाशे.

अमे छीए
आंबली पोळना ट्रस्टीओ

छट्ठा परिच्छेदमां प्रमाण विषयनी चर्चा अने प्रमाणनां फलोनी मीमांसा करी छे.

सातमा परिच्छेदमां नयविषयक ज्ञान उदाहरणो साथे बहु ज विस्तारथी जाणवा मळे छे.

आठमा परिच्छेदमां वाद, जिगीषु आदिनां लक्षणो पूर्वक वादी, प्रतिवादी, सभा, सभ्य, वाद्स्थाननां लक्षणो बताव्यां छे.

विद्वद्वर्य शान्तस्वभावी स्व. मुनिराज श्री. हिमांशुविजयजी म. श्रीए आ ग्रन्थनुं संशोधन कर्युं हतुं अने ते पहेली आवृत्तिनी ज प्रस्तावना साथे कंई पण फेरफार कर्या वगर अमे फरीथी जोई गया छीए, जेनुं आ द्वितीय मुद्रण छे.

विक्रम सं. २०२५ नां पर्युषण आंबली पोळ जैन उपाश्रयना ट्रस्टीओना आग्रहने लईने मारे अहीं करवानां हतां ते प्रसंगे आगेवानोने आ पुस्तकनी उपादेयता माटे वात करी हती.

मने जणावतां अत्यन्त आनंद थाय छे के उपाश्रयना मुख्य ट्रस्टी शेठ श्री. केशवलाल लल्लुभाई झवेरीए अने बीजा आगेवानोए पण आनाकानी कर्या वगर आ पुस्तकने फरीथी छपाववानो प्रबंध आंबली पोळ जैन उपाश्रयना ज्ञानखातामांथी कर्यो छे, ते बदल तेमने खूब खूब धन्यवाद.

पंडितप्रवर श्रीमान् अंबालाल प्रेमचंद शाह, जे मारा प्राथमिक विद्यागुरु छे तेमनी महेनत पण धन्यवादने पात्र छे, ए मारे कबूल करवुं रह्युं.

परमपूज्य गुरुदेवोनो फरीथी उपकार मानीने संपादकीय निवेदन पूरुं करुं ते पहेलां—जैन समाजनी धार्मिक पाठशाळाना संचालकोने, अने न्यायनुं पठन करवा मांगता पू. साधु—साध्वीजी महाराजाओने साग्रह निवेदन करीश के तर्कसंग्रहना बदले 'प्रमाणनयतत्त्वालोक'-ना पठनमां वधारे आग्रह राखशो, कारण के; शरूआतमां प्रमाणनय-तत्त्वालोकने भणतां आपणी श्रद्धा स्थिर थशे अने जैनशासनना मूळभूत विषयो जेवा के सम्यग्ज्ञान, केवळज्ञान, केवळी भगवान्, शब्दनी पुद्‌गलता, आप्तवचन, श्री जैनागम, आगमसिद्धि, सर्वज्ञसिद्धि, सामान्य-विशेषात्मक प्रमेय, सप्तभंगी अने नयोनी विशद व्याख्याथी आपणुं हृदय जैनशासननी वफादारी स्वीकारवा तैयार थशे, ते उपरांत तर्कसंग्रहनो पूरेपूरो विषय 'प्रमाणनय....' पुस्तकना तृतीय परिच्छेदमां समायेलो छे. माटे न्यायना अभ्यास माटे प्रमाणनय-तत्त्वालोक सिवाय बीजो कोई ग्रन्थ नथी ज एटलुं निवेदन अहीं पर्याप्त थशे.

आंबलीपोळ, झवेरीवाड—अमदावाद
मागशर सुदि १०
धर्म सं. ४८, वि. २०२६

पूर्णानन्दविजय

उपोद्घात

गुजरातमां दर्शनविद्या प्राचीन काळथी प्रचलित हती. तेमां जैन आचार्योए नोंधपात्र फाळो आप्यो छे. आचार्य मल्लवादीनुं नयचक्र विक्रमनी पांचमी शतीमां समग्र भारतीय दर्शनधाराओनो समावेश करीने रचायुं छे. आचार्य हरिभद्रे पण षड्दर्शनसमुच्चय, शास्त्रवार्तासमुच्चय अने धर्मसंग्रहणी जेवा ग्रन्थो रचीने दार्शनिक तत्त्वविचारणा करी छे. परंतु प्रमाणविद्या विषे आचार्य वादी देवसूरि (वि. ११४३-१२२६)ना 'प्रमाण-नयतत्त्वालोक'नुं अनोखुं स्थान छे; कारण, तेमणे तत्त्वविचारणाना साधन प्रमाणने केन्द्रमां राखीने ते ग्रन्थनी रचना करी छे. भारतीय दर्शननोना विचार-विकासमां प्रमेयविचारणा तो घणा काळथी थती हती पण न्यायसूत्र पछी प्रमाणने कोईए महत्त्व आप्युं होय तो ते बौद्धोए. एटले त्यार पछी प्रमाणविद्या विषे विस्तृत साहित्य रचायुं छे, प्रमाणकेन्द्रित जैनदार्शनिक साहित्यनी खोटनी पूर्ति करवानो एक प्रयत्न 'न्यायावतार'मां सिद्धसेने कर्यो अने तेना विवरणनो प्रयत्न जिनेश्वरना 'प्रमालक्ष्म' अने शान्त्याचार्यना 'वार्तिक'मां थयो पण ते पर्याप्त हतो नहि. आथी समग्र भावे चर्चाने समेटी लेतो वादी देवसूरिनो 'प्रमाणनयतत्त्वालोक' तेनी टीका 'स्याद्वादरत्नाकर' साथे गुजरातना दार्शनिक साहित्यमां अनोखुं स्थान धरावे छे.

वादि देवसूरि समक्ष आचार्य माणिक्यनंदिनुं 'परीक्षामुख' हतुं ज अने उपरांत दार्शनिक साहित्य तेमणे जे मळी शक्युं ते भेगुं कर्युं. अने एम कहेवुं जोईए के परीक्षामुखनुं ज नवुं संस्करण, तेमां

जे कांई खूटतुं हतुं ते उमेरीने, आलंकारिक भाषामां तैयार कर्युं अने 'सटीक-प्रमाणनयतत्त्वालोक'ने एक आकर ग्रन्थनुं स्वरूप आपी दीधुं.

वादी देवसूरि अने तेमना ग्रन्थो विषे में 'रत्नाकरावतारिका'नी प्रस्तावनामां लख्युं छे[1] तेथी तेनी पुनरावृत्ति जरूरी नथी. एटलुं जाणवुं बस थशे के वादी देवसूरि ते काळना गुजरातमां एक समर्थ दार्शनिक हता; जेनो जोटो जडवो दुर्लभ छे.

जैन दर्शन विषे विचार करीए तो तेना आगमयुगमां (वि० पू० ५००–विक्रम ५००) तत्त्वनी विचारणा एटले तत्त्वोनी अने ज्ञानना प्रकारोनी गणतरी–विभागीकरण ए मुख्य हतुं. तत्त्वनुं स्वरूप केवुं होवुं जोईए ए विषे दार्शनिकोमां चालती चर्चाना अनुसंधानमां जैन दार्शनिकोए अनेकान्तवादनी स्थापना करी अने तेनुं समर्थन कर्युं ते जैन दर्शनचर्चानो बीजो युग छे (वि० ५००–८००). तेमां समन्तभद्र, अकलंक, हरिभद्र आदि अनेक आचार्योए अनेकांतवादनी स्थापना अने व्यवस्था माटे भगीरथ प्रयत्न कर्यो अने इतर दार्शनिकोमां जैन दर्शनने स्याद्वादी दर्शन के अनेकान्तवादी दर्शनरूपे प्रतिष्ठा अपावी. तत्त्वने पामवानो के तेना निरूपणनो एक नहि पण अनेक दृष्टि होई शके छे अने तेथी मात्र एक ज दृष्टिए करेल निरूपण अधूरुं अने ऐकान्तिक बनी जाय छे. ते विचारवानो प्रयत्न अनेकांतमां छे – आवी स्थापना अनेकांतवादनी छे.

---

१. आ ग्रन्थ, ला० द० भारतीय संस्कृति–विद्यामंदिर, अमदावाद तरफथी त्रण भागमां अनुवाद साथे प्रकाशित थयो छे.

बौद्धए ज्यारे प्रमाणचर्चा उपर भार आप्यो त्यारे भारतीय बधां दर्शनोए पोतपोतानी प्रमाणविद्यानुं पुनर्निरीक्षण अने पुनर्व्यवस्थापन कर्युं. आ बधुं चालतुं हतुं त्यारे जैन दार्शनिकोए पण आगमकाळथी चाली आवती ज्ञानचर्चाने प्रमाणचर्चामां परिवर्तित करी दीधी अने तेना परिपाकरूपे वि०नो आठमी शतीथी जैन प्रमाणविद्यानो युग शरू थाय छे. ते युगनी रचना 'प्रमाणनयतत्त्वालोक' छे तेथी तेमां प्रमाणकेन्द्रित जैनदर्शननी चर्चा छे.

प्रमाणनयतत्त्वालोकनी स्याद्वादरत्नाकरटीका ए खरेखर दर्शनप्रमेयोनो रत्नाकर ज छे. पण ए एटली बधी विस्तृत छे के प्रारंभिक विद्यार्थीओ माटे ते उपयोगी थई शके तेवी नथी. तेनो संक्षेप 'रत्नाकरावतारिकावृत्ति'मां आचार्य रत्नप्रभे कर्यो छे पण ते पण भाषा अने विचार-चर्चानी क्लिष्टताने कारणे सुगम नथी. आथी अतिसंक्षिप्त टीकानी आवश्यकता हती ज, जेनी पूर्ति प्रस्तुत पुस्तकमां मुद्रित बालबोधिनी द्वारा करवामां आवी छे. आनुं पुनर्मुद्रण थाय छे ते ज तेनी उपयोगितानुं प्रमाण छे.

लो० द० भारतीय संस्कृति
विद्यामंदिर, नवरंगपुरा
अमदावाद, ९
ता. १.१.१९७०

दलसुख मालवणिया

प्रस्तावना

भोः ! भोः ! दर्शनविमर्शनदत्तचित्ताः ! चेतस्विनः ! दर्शनशास्त्रं नाम स्वर्गापवर्गमार्गदर्शनप्रदीपः, सर्वविद्यासु शेखरायमाणा विद्या, मानवजन्मवृक्षस्याक्षुण्णं फलं, ग्रीष्मेऽप्यतापकरः प्रकाशः, अकम्पकरं शैत्यं, अक्लेदकरं स्नानं, अनास्यक्लेशकरं हास्यं, अनौषधमारोग्यमस्ति । तदेव विविधमततर्कमार्गाणां कुलपर्वत इव नदीवेगानां जनकमजनि ।

भगवतस्तीर्थकृतः श्रीऋषभदेवस्यानन्तरं[1] जैनदर्शनमाविर्बभूव । ततश्च यथाप्रयोजनं यथापात्रं च [2]कपिलादिभ्यः सांख्यादीनि नैकानि मतान्युदभुवन्, तेषु कतमद्दर्शनं प्राचीनं कतमच्चार्वाचीनमिति निर्णेतुं नास्तीदानीमसर्वज्ञस्य कस्यचित् पार्श्वे निर्बाधं साधनम्, अतो न वयं दर्शनानां प्राचीनार्वाचीनत्वसाधनेऽधिकृतचेष्टां कुर्महे ।

जैनागमोत्पत्तिः

कालप्रवाहापेक्षया जैनदर्शनमनादिनिधनमपि वर्तमानावसर्पिणी-कालभवचतुर्विंशतितीर्थकरापेक्षया [3]श्रीऋषभदेवाद् भगवत उदपद्यतातः सादिकमित्यपि वक्तुं शक्यते । पूर्वतीर्थंकरसिद्धान्ते विनष्टे सति सर्वत्र धर्मशैथिल्ये प्रविष्टेऽपरस्तीर्थंकरः समुत्पद्य स्वकालस्थलोकेभ्यस्तत्कालक्षेत्र-

---

१. त्रिषष्टिशलाकापुरुषचरित्रे, १ पर्वणि ।

२. वैदिक-जैनादीनां मुख्यग्रन्थेषु परस्परदर्शनोल्लेखदर्शनात्, यथा-ब्रह्मसूत्रे द्वितीयाध्याये, ऋग्-यजुर्वेदादिषु च जैनदर्शनोल्लेखो नैकशो दृश्यते । जैनग्रन्थेषु च सांख्य-नैयायिक-चार्वाक-वेदान्तादिदर्शनोल्लेखो परीवर्ति ।

३. श्रीमद्भागवतेऽपि (५ स्कन्धे) ऋषभदेवस्य चरित्रं कीर्तितमस्ति ।

स्वभावादिकमपेक्ष्य तदेव प्रमाण-प्रमेयादि निर्बाधं तत्त्वं तत्तत्काल-लोकानुकूलया सरण्या परेभ्य उपदिशति, यत् पूर्वतीर्थंकरैरुपदिष्टमिति जैनप्रणाली।

एवं क्रमशस्त्रयोविंशतीर्थंकरश्रीपार्श्वनाथशासनस्य विच्छेदे सति वर्यज्ञानतपश्चर्यादिश्रिया वर्धमानः श्रीवर्धमानापरनामा महामनाश्चतुर्विंश-तीर्थंकरः श्रीमहावीरप्रभुः प्रभूय केवलाऽऽलोकेन यत् प्रमातृ-प्रमाण-प्रमेयादितत्त्वं प्रकटीचकार तदेव श्रीइन्द्रभूतिगौतमगणधरादिभिस्त-च्छिष्यैर्भूरिसूरिभिश्च सूत्रग्रन्थादिरूपेण संगृहीतं, तस्य संग्रहस्य जैनागम-श्रुतसूत्रसमयसिद्धान्तादीनि नामधेयानि सन्ति। स च संग्रहो मूल-भेदाद् द्वादशधा, मूलेतरभेदैश्चानेकधा वर्तते।

आगमसाहित्ये दर्शनशास्त्रम्

आगमसाहित्यस्य मुमुक्षुमोक्षप्रापकत्वात् प्राचीनत्वात् समग्रप्रति-बोधकत्वाच्च तत्र दर्शनशास्त्रस्यातीवसंक्षेपतया खण्डशश्च निर्देशः कृतः। तथापि सूत्रकृताङ्गसूत्रे समयाख्ये प्रथमाध्ययने बौद्ध-चार्वाक-सांख्य-मद्वैतवादि-नियतिवादि-क्रियाऽक्रियावादि-ज्ञानाऽज्ञानवादिप्रभृतीनां नैकानि दर्शनानि प्रमाणानि च निर्दिश्य निराकृतानि। दृष्टिवादाख्ये

४. सूत्रकृताङ्गद्वितीयेऽध्ययने।

५. अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं।
सासणस्स हियट्ठाए तओ सुत्तं पवत्तेई॥ "विशेषावश्यकभाष्ये गाथा ११९६"।

६. तत्त्वार्थभाष्ये, अ. १-२०।

यद्यपि नन्दीसूत्रादिषु आगमतर्कपद्धत्यनुकूलः प्रमाणद्वयवादोऽपि विलोक्यते, नयवादानन्तरेण च सूत्रान्तरेषु कुत्रचित् प्रत्यक्षानुमानोपमानागमाख्यं प्रमाणचतुष्टयमन्यथ प्रकारो दृश्यते, परन्तु तेषु सूत्रेषु प्रमाणसङ्ख्याविषये समन्वयस्तु न समीक्ष्यते।

आगमतर्कपद्धत्या प्रमाणविचारः

तर्कमार्गं मुख्यतयाऽनुसरद्भिर्जैनतार्किकैः प्रत्यक्ष-परोक्षप्रमाणद्वयवादः स्थापितः, स च विचार्यमाणायामागमपद्धत्यां न विरुद्ध आगमपद्धतित इति निश्चितं प्रतिभाति। अत एवाऽऽगमेतरग्रन्थकारेषु प्रथमं श्रीउमास्वातिवाचकवर्यैः 'तत्त्वार्थाधिगमे सूत्रे' आगमरीत्या पञ्चविधं ज्ञानं प्रदर्श्य "आद्ये परोक्षम्" (तत्त्वार्थ० अ० १, सू० ११) "प्रत्यक्षमन्यत्" (त० १–१२) इति सूत्राभ्यां तत् प्रत्यक्ष-परोक्षप्रमाणयोर्मध्येऽन्तर्भावितम्। "तत्प्रमाणे" (त० १–१०) इति सूत्रेण च प्रमाणस्य द्वैविध्यमेव स्थापितम्। "सर्वाण्येतानि मतिश्रुतयोरन्तर्भूतानीन्द्रियार्थसन्निकर्षनिमित्तत्वात्। किञ्चान्यत्, अप्रमाणान्येव वा। कुतः? मिथ्यादर्शनपरिग्रहाद् विपरीतोपदेशाच्च" (तत्त्वार्थ० १–१२ भाष्यम्) इति स्वोपज्ञभाष्ये च प्रत्यक्षानुमानोपमानाऽऽगमाख्यः प्रमाणचतुष्टयवादोऽपि निरस्तः।

---

९. नन्दीसूत्रं २, पृ० २२।

१०. श्रीसिद्धसेनदिवाकर-हरिभद्र-विद्यानन्द-माणिक्यनन्द्यादिभिः।

११. आगमपद्धतिपक्षपातिभिः श्रीदेववाचक-जिनभद्रक्षमाश्रमणादिभिरपि प्रमाणद्वयं स्वीकृतम्।

१२. तत्त्वार्थ० १-१०।

यस्तु आगमेऽनन्तरोक्तप्रमाणचतुष्टयवादोऽपि दृश्यते; स नैयायिकादिसिद्धान्तापेक्षया वर्तते, नयवादान्तरेण च तत्र प्रतिपादितो भवेदिति समाहितं तैः ।

परनिमित्तेन्द्रियसन्निकर्षादिहेतुना जायमानानां लौकिकप्रत्यक्षानुमानादिप्रमाणानां परोक्षप्रमाण एवान्तर्भावो भावनीयः । उपमानादीनां च पृथक्प्रमाणत्वाभावाद् मुख्यतया सर्वप्रमाणसंग्राहिणी प्रत्यक्ष-परोक्षभणितिरेव घटाकोटिमाटीकते इति निष्कर्षः ।

ततो जैनतर्कशास्त्रव्यवस्थापकैः श्रीविक्रमादित्यमण्डलीमण्डनैः श्रीसिद्धसेनदिवाकरपादैर्न्यायावताराख्ये ग्रन्थे प्रमाणस्य प्रत्यक्ष-परोक्षलक्षणं [१४]द्वैविध्यमङ्गीकृतम् । [१५]जिनभद्रक्षमाश्रमण—[१६]हरिभद्रसूरि—[१७]विद्यानन्द-[१८]माणिक्यनन्दि—[१९]अकलङ्कभट्ट-जिनेश्वरसूरिप्रभृतिभिः सर्वैः श्वेताम्बर-दिगम्बरसूरिवर्यैरपि मुख्यतया प्रत्यक्ष-परोक्षाभिधं प्रमाणद्वयमेव स्वेषु स्वेषु ग्रन्थेषु प्रतिपादितम् ।

इन्द्रियमनोनिमित्तं मतिनामधेयं ज्ञानमस्ति; तद् आगमेषु तत्त्वार्थ-

---

१३. न्यायावतारप्रथमश्लोकटीका । प्रमाणपरीक्षा पृ० ६३-६७

१४. प्रमाणं स्वपराभासि ज्ञानं बाधविवर्जितम् ।
प्रत्यक्षं च परोक्षं च द्विधा मेयविनिश्चयात् ॥ —न्यायाव० १ ।

१५. विशेषावश्यकगाथा ८८ ।

१६. षड्दर्शनसमुच्चये श्लो० ५५ ।

१७. अष्टसहस्रीग्रन्थे ।

१८. परीक्षामुखे २ समुद्देशे सूत्रम् १ ।

१९. लघीयस्त्रये ।

सूत्रे च 'अक्षेभ्यः, परतो वर्तते' इति, [२१]परोक्षतयैव प्रतिपन्नम् । नैयायिक-बौद्धादीनां तर्कस्य विकसिते सति, इन्द्रियमनोनिमित्तं घट-पट-सुखादिज्ञानमपि [२२]प्रत्यक्षम्' इतिकल्पना सर्वत्र प्रसृतवती; सा च स्थूलव्यवहारदृष्ट्या जैनानामपि नानुचितेति हेतोर्नन्दिसूत्रादिषु इन्द्रियव्यवधानात् तादृशं मतिज्ञानं परोक्षमपि लौकिकप्रत्यक्षतया समर्थितम् । विशेषावश्यकभाष्येऽपि " इंदियमणोभवं जं तं संववहारपच्चक्खं " (गाथा ९५)—इति गाथया घटपटसुखादिज्ञानस्य व्यवहारेण प्रत्यक्षत्वमङ्गीकृतम् । वस्तुतस्तु आत्मातिरिक्तद्वारा जायमानत्वात् तदप्रत्यक्षमेवास्तीति [२३]नन्द्यादिषु समाहितम् ।

---

२०. "अश्नुते, अक्ष्णोति वा व्याप्नोति सकलद्रव्यक्षेत्रकालभावान् इत्यक्षो जीवः । अश्नुते विषयमित्यक्षमिन्द्रियं च ॥" (१-१-१०) इति श्रीप्रमाणमीमांसावृत्तौ हेमचन्द्रप्रभुरक्षव्याख्यामाचख्यौ ।

२१. पराणीन्द्रियाणि मनश्च प्रकाशोपदेशादि च बाह्यनिमित्तं प्रतीत्य तदावरणकर्मक्षयोपशमापेक्षस्याऽऽत्मन उत्पद्यमानं मतिश्रुतं परोक्षमित्याख्यायते त० सर्वार्थसिद्धिटीका । अ० १-११ ।

२२. "एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम् । तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षो वर्णितः, अलौकिकसन्निकर्षस्त्विदानीमुच्यते —

" अलौकिकव्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा" ॥ ६३ ॥

इति सिद्धान्तमुक्तावलीप्रत्यक्षखण्डे, पृ० ३३ । न्यायबिन्दुप्रथमपरिच्छेदे । योगसूत्रवृत्तिसमाधिपादे । सांख्यकारिकागौडपादभाष्ये पृ० ४ । नन्दीसूत्रं ३, पृ० २३ । एवमाप्तपरीक्षा-प्रमेयकमलमार्तण्ड-प्रमाणलक्षणादिष्वपि च ऐन्द्रियकज्ञानं सांव्यवहारिकत्वेन प्रतिपादितम् ।

२३. नन्दिसूत्रं २४, पृ० ५१ । तत्त्वार्थसूत्र-न्यायावतारादिष्वप्यप्रत्यक्षमेवोक्तम् ।

प्रमाणनयतत्त्वालोकाऽऽलोचना

प्रौढसैद्धान्तिक-तार्किक-वैयाकरण-कविचक्रवर्ति-नैकभाषाकोविदैः श्रीवादिदेवसूरिपादैरागम-[24]सिद्धसेन-हरिभद्राचार्यादिग्रन्थानभ्यस्य, दुर्वादिवादांश्च निरस्य, तीर्थंरतिमुपास्य प्रमाणनयतत्त्वालोकाख्योऽयं ग्रन्थो जग्रन्थे। अत्र ग्रन्थे पूर्वसूरिसूरिरीतिमनुसृत्य प्रत्यक्ष-परोक्षलक्षणं प्रमाणस्य द्वैविध्यं प्ररूपितम्। प्रत्यक्षस्य तावत् सांव्यवहारिक-पारमार्थिकौ भेदौ प्रदर्श्य सांव्यवहारिकप्रत्यक्षस्येन्द्रियानिन्द्रियनिबन्धनाद् द्वौ प्रकारौ प्रदर्शितौ। इन्द्रियानिन्द्रिययोश्चैकशोऽवग्रहादिभेदेन चतुःप्रकारत्वमुल्लिखितम्[25]। पारमार्थिकप्रत्यक्षस्य चागमतर्कपद्धतिसंमताऽवधि-मनःपर्याय-केवलज्ञानभेदतः त्रैविध्यं समर्थितम्। परोक्षस्य स्मरण-प्रत्यभिज्ञान-तर्कानुमानागमभेदैः पञ्चविधत्वमुक्तम्। प्रत्यक्षानुमानयोः स्वार्थ-परार्थता च सिद्धसेनदिवाकरादिवत् साधिता।

श्रीवादिदेवसूरिसमयपर्यन्तं प्रमाण-नयादिविषये दार्शनिको यावान् विकासोऽभवत् तावन्तं समस्तमत्र ग्रन्थे ते सूत्रितवन्तः। पक्ष-साध्य-दृष्टान्त-हेतूपलब्ध्यनुपलब्धि-सप्तभङ्गी-हेत्वाभास-नय-नयाभास-वाद-वादि-

---

२४. श्रीसिद्धसेन-हरिभद्रमुखाः प्रसिद्धास्ते सूरयो मयि भवन्तु कृत-प्रसादाः। येषां विमृश्य सततं विविधान् निबन्धान् शास्त्रं चिकीर्षति तनुप्रतिभोऽपि मादृक्॥ प० १. स्याद्वादरत्नाकरस्य प्रथमे भागे श्लो० ८।

२५. प्रमाणपरीक्षा-प्रमाणलक्षण-न्यायदीपिकादिदिगम्बरग्रन्थेष्वपि प्रत्यक्षस्यैते सर्वे प्रकारा दृश्यन्ते। अवग्रहादयोऽसंख्यादयश्च भेदा आगमेष्वपि सन्ति। श्रीहेमचन्द्रसूरिभिस्तु विस्तरात् प्रमाणमीमांसायां प्रमाणभेदा दर्शिताः।

स्वरूपभेदादिकं सविस्तरमस्मिन् ग्रन्थेऽतीव स्पष्टतया प्रतिपादितम्, येनाल्पमतिरपि सम्यक्तया पठितुं प्रत्यलो भवेत् ।

परीक्षामुखेन सह तुलनाविचारः

अस्य प्रमाण-नयतत्त्वालोकस्य सरणिर्माणिक्यनन्दिविरचितपरीक्षामुखसदृशी प्रतिभासते । परन्तु यादृशं स्पष्टत्वं विशेषत्वं ललितपदोपन्यासत्वं च प्रमाणनयतत्त्वालोके विलोक्यते; तादृक्षं परीक्षामुखग्रन्थे न प्रेक्ष्यते । तथाहि—सन्निकर्षादिखण्डन-विपर्ययादिलक्षणाऽवग्रहादिभेद[२६]-चतुष्टयावध्यादिविकलपारमार्थिकज्ञान - चतुर्विधाऽभाव-सप्तभङ्गी-सकलादेश-विकलादेश-नय-तदाभासभेदलक्षणोदाहरण-वाद[२७]-वादि-सभ्य-सभापतिस्वरूपादिकं परीक्षामुखग्रन्थे न ग्रथितम् । प्रमाणनयतत्त्वालोके त्वेतत् सकलं समस्ति ।

परीक्षामुखे षट्समुद्देशेषु २१२ सूत्राणि वर्तन्ते प्रमाणनयतत्त्वालोकेऽष्टपरिच्छेदेषु ३७८ सूत्राणि सूत्रितानि सन्ति । श्वेताम्बर-

---

२६. प्रमेयरत्नमालाख्यायां परीक्षामुखटीकायां तु प्रत्यक्षस्यावग्रहादयो विकलपारमार्थिकप्रत्यक्षभेदाश्च लिखिताः । प्रमेयकमलमार्तण्डेऽप्येते प्रतिपादिताः सन्ति ।

२७. "प्रमाणतदाभासौ......(परीक्षामुखं ६–७३)" इत्येकेन सूत्रेण वादिप्रतिवादिविषये सूचितम् । "सम्भवदन्यद्विचारणीयमिति" (परीक्षा ६–७४) इत्यन्तिमसूत्रेण च तत्रानुक्तनय-नयाभासादिविषयेऽन्यतो ज्ञेयमिति प्रेरितं परीक्षामुखकर्त्रा, परं न तत्र ग्रन्थे सूत्रितम् ।

दिगम्बराणां दर्शनविषये प्रायः समानसिद्धान्तत्वात् प्रमाणस्य लक्षण-संख्या–विषय–फल–तदाभासादीनां सूत्रपद्धत्याश्च साम्यं द्वयोरपि ग्रन्थयोर्मध्ये वरीवर्ति । एतत्साम्यं समीक्ष्य कोऽपि दुस्साहसाद् यद्येवं कथयेद् यत् 'वादिदेवसूरिणा परीक्षामुखात् सूत्राणि संगृहीतानि तद्रचना कौशलं वा तस्मादासादितमिति' तदा तस्य तद् दुःसाहस-प्रलपितत्वान्न कक्षीकरणार्हं प्रेक्षादक्षाणाम् । न हि किञ्चित्साधर्म्य-मात्रेणैतत्-संग्रहस्तदनुकरणता वा सिध्यति, अतिप्रसङ्गात्, अन्यथा जैनेन्द्रप्रक्रियादिव्याकरणग्रन्थेष्वपि पाणिन्यादिसूत्रसादृश्यदर्शनात् तत्रापि पाणिनीयव्याकरणादितः तत्-सूत्रसंग्रहानुकरणतापत्तिः कथं न स्यात्? तुल्ययोगक्षेमत्वात् । किञ्चानेकवादिजिष्णुर्धिषणानिराकृतधिषणश्चतुर-शीतिसहस्रश्लोकात्मकस्याद्वादरत्नाकरमहावादग्रन्थस्य रचयिता श्रीवादि-देवसूरिरपरस्य सूत्राणि तद्रचनाकौशलं वा गृह्णीयादिति कः खलु कोविदः श्रद्दधीत ?

अस्य ग्रन्थस्य नामधेयम्

श्रीवादिदेवसूरिणा सूत्ररूपो यो ग्रन्थो ग्रथितस्तस्य "प्रमाण-नयतत्त्वालोकालङ्कारः" इति नाम साम्प्रतं सर्वत्र प्रसिद्धमास्ते, परन्तु

---

२८. शेषं श्वेताम्बरस्तुल्यमाचारे दैवते गुरौ ।
श्वेताम्बरप्रणीतानि तर्कशास्त्राणि मन्वते ॥ २७ ॥
स्याद्वादविद्याविद्योतात् प्रायः साधर्मिका अमी ॥ २८ ॥
—राजशेखरीयषड्दर्शनसमुच्चयः ।

२९. संस्कृतभाषायां सर्वेषां [illegible] सूत्रनिर्माणपद्धति-स्वीकृता ।

तन्न युक्तम्, यतो ग्रन्थकर्त्रा त्वस्य 'प्रमाणनयतत्त्वालोकः' इत्येव नामधेयं स्थापितमित्यस्यैव ग्रन्थस्य विस्तृतस्वोपज्ञटीकारूपस्याद्वादरत्नाकरग्रन्थान्तःपाठतः स्पष्टं प्रतिभासते । तथाहि – "कथं पुनः प्रमाणनयतत्त्वालोकः शास्त्रम्? येन तदाऽऽरम्भे परम्परागुरुप्रवाहः स्मर्यते, इति चेत्, उच्यते,........" "तच्चाष्टपरिच्छेदीरूपस्य प्रमाणनयतत्त्वालोकस्यास्तीति सोऽपि शास्त्रम्"—स्याद्वादरत्नाकरः १ परि०, १ भागः, पृ० ७ आर्हतमतप्रभाकरमुद्रितः । तथा—

"इदं स्वसंवेदनप्रत्यक्षेणान्तस्तत्त्वरूपतया प्रतिभासमानं प्रमाणनयस्तत्त्वालोकाख्यं शास्त्रम्"—स्याद्वादरत्नाकरप्रथमभागः, पृष्ठम् ९ । श्रीवादिदेवसूरेः प्रियतमशिष्यश्रीरत्नप्रभसूरिः स्याद्वादरत्नाकरसाररूपां रत्नाकरावतारिकां टीकां रचयाञ्चक्रे, सोऽपि तस्यां प्रस्तुतग्रन्थस्य "प्रमाणनयतत्त्वालोकः" इत्येव नाम प्रकटीचकार, तथाहि—

"सोऽपि समासतः सूत्राभिधेयावधारणं विना नः इति प्रमाणनयतत्त्वालोकाख्यतत्सूत्रार्थप्रकाशनपरा रत्नाकरावतारिका नाम्नी लघीयसी टीका प्रकटीक्रियते ।" रत्नाकरावतारिका यशोवि० ग्रन्थमालामुद्रिता पृ० २ * ।

शब्दार्थेऽपि विचार्यमाणे प्रमाण-नययोस्तत्त्वं, तस्यालोकः—प्रकाश इति 'प्रमाणनयतत्त्वालोकः' इत्येवास्य पर्याप्तं युक्तं च नाम प्रतिभासते । 'आलोकस्यालङ्कारः' इति नाम तु निरर्थकमविशिष्टार्थं वा प्रतिभाति । यद्यपि मुद्रितस्याद्वादरत्नाकरस्य प्रत्येकपरिच्छेदान्ते[30]

---

* अस्यापरं मुद्रणं गूर्जरभाषानुवादसहितमनेकपरिशिष्टादिभिरलंकृतं, अहम्मदावादस्थला० द० भारतीयसंस्कृतिमन्दिरात् कृतमस्ति ।

३०. आर्हतमतप्रभाकरमुद्रितस्याद्वादरत्नाकरप्रथमभागे पृ० २५७ ।

"इति श्रीदेवाचार्येण विरचिते स्याद्वादरत्नाकरे प्रमाणनयतत्त्वालोकालङ्कारे प्रमाणस्वरूपनिर्णयो नाम प्रथमः परिच्छेदः ॥ १ ॥" इति पाठो दृश्यते, परन्तु परिच्छेदान्त उपसंहारोल्लेखमेदस्तु लिपिकारविहितोऽपि भवेद्, इति संभावनायाः संभवात्, सन्दिग्धत्वं, तं संदेहं 'प्रमाणनयतत्त्वालोकः' इतिरूपं ग्रन्थान्तर्निर्दिष्टं ग्रन्थकारपाठत्रयं निराकुर्वत् निश्चापयति यदस्य प्रमाणनयतत्त्वालोक इत्येव ग्रन्थकारसम्मतमभिधानमस्ति, नान्यदिति ।

भावनगरस्थश्रीविजयधर्मसूरीज्ञानमन्दिरस्य रत्नाकरावतारिकाहस्तलिखितपुस्तकद्वयस्य प्रथमपरिच्छेदान्ते, तथा प्रमाणनयतत्त्वालोकमूलग्रन्थस्य लिखितपुस्तकस्य प्रथमपरिच्छेदान्ते चोपसंहारपङ्क्तिषु "श्रीप्रमाणनयतत्त्वालोके" इत्येव पाठो विद्यतेऽतो मूलग्रन्थकारतच्छिष्यलिखितपाठचतुष्टयेन संवादभृतेन युक्त्या च निर्बाधमिदं सिध्यति यत् प्रस्तुतग्रन्थस्य 'श्रीप्रमाणनयतत्त्वालोकः' इत्येव नामधेयं श्रीवादिदेवसूरिभिर्विहितम्, न 'प्रमाणनयतत्त्वालोकालङ्कारः' इति। किञ्च विद्वद्ग्रन्थनामानि प्रायः संक्षिप्तानि भवन्ति ।

या च प्रसिद्धिरलङ्कारान्तस्य जाता; सास्य ग्रन्थस्य श्रेष्ठतमत्वात् "अलङ्कारभूतोऽयं ग्रन्थो न्यायग्रन्थेषु" इतिलोकप्रतीतिहेतोः, लिपिकारस्य वा भ्रान्त्या समजनीति संभाव्यते। यथा—दिगम्बराणां तत्त्वार्थाधिगमसूत्रविधातुः श्रीउमास्वातिपादस्य श्रीउमास्वामित्वेन प्रसिद्धिर्जाता; सा च बहुकालतो भ्रान्तिसंभवेति साधितं सप्रमाणं दिगम्बरपण्डितश्रीयुगलकिशोरादिमहाशयैः, तदद्यापि वेदितव्यमिति मामकी मतिः ।

११. अनेकान्तवर्षे, १ वर्षस्य, ५ किरणे पृ० २६९ ।

बोधोऽपि प्रीतः । यदा देवसूरिर्मरुदेशस्थनागपुरं पुरं जगाम तदा आह्लादनाख्येन भूपेन सहाभिमुखमागत्य देवबोधो देवसूरिमेवं स्तुतवान्—

यो वादिनो [४३]द्विजिह्वान् साटोपं विषयमानमुद्गिरतः ।
शमयति स देवसूरिर्नरेन्द्रवन्द्यः कथं न स्यात् ॥

—प्रभावकच० दे०प्र० ७६ ॥

वादिकुमुदचन्द्रेण सह वादः


श्रीदेवसूरिर्यदा कर्णावतीं गत्वा वर्षाचतुर्मासीं तस्थौ तदा जयकेशिदेवाख्यस्य कर्णाटनृपतेर्गुरुर्जितानेकसभो मदोद्धुरः कुमुदचन्द्र-नामा दिगम्बरवादी अपि तत्र तस्थिवान् । विविधैरुपायैः कुमुदचन्द्रो देवसूरिं वादाय उत्तेजितवान् । शान्ताऽऽत्मापि देवसूरिस्तन्मद-विनाशाय श्रीपत्तने गुर्जरराजसभायां वादं विधातुं प्रतिज्ञाय कुमुद-चन्द्रं च प्रेर्य शुभे शकुनजाते मुहूर्ते पद्भ्यां प्रयात्य पत्तनमा-जगाम ।

---

४३. सर्पाणां राज्ञां च शमने समानधर्मत्वं, मुद्राराक्षसे विशाखादत्तेन द्वितीयाङ्के प्रोक्तं तद् यथा—

जाणंति तन्तजुत्तिं जहट्ठिअं मंडलं अहिलिहन्ति ।
जे मन्तरक्खणपरा ते सप्पणराहिवं उवअरन्ति ॥

देवसूरिप्रयाणकुण्डली



कुमुदचन्द्रोऽपि पत्तनमाजिग्मवान् । तत्र श्रीसिद्धराजे सभापतौ सति, ११८१ वैक्रमे वर्षे वैशाखपूर्णिमादिने तयोर्वादारम्भः संबभूव । पणबन्धश्चायमजनि—

पणबन्धः

१—वादे यदि कुमुदचन्द्रः पराभूयेत तदा तेन गुर्जरदेशत्यागो विधेयः ।

२—देवसूरिश्चेत् पराभूयेत तदा स गुर्जरदेशीयश्वेताम्बरैः सह दिगम्बरमतमङ्गीकुर्यादिति ।

---

४४. प्रयाणप्रतिपादकश्लोकस्त्वयं प्रभावकचरित्रे—

ततः सूरिर्दिने शुद्धे मेषलग्ने रवौ स्थिते ।
कलशस्थे शशाङ्के च षष्ठे राहौ रिपुद्रुहि ॥ १२९ ॥

अनेन श्लोकेन ज्ञायते यद्देवसूरिणा चैत्रकृष्णपूर्णिमायां तत्प्रतिपत्तिदिने वा दिने प्रयाणमकारीति ।

बोधोऽपि प्रीतः । यदा देवसूरिर्मरुदेशस्थनागपुरं पुरं जगाम तदा आह्लादनाख्येन भूपेन सहाभिमुखमागत्य देवबोधो देवसूरिमेवं स्तुतवान्—

> यो वादिनो [४३]द्विजिह्वान् साटोपं विषयमानमुद्गिरतः ।
> शमयति स देवसूरिर्नरेन्द्रवन्द्यः कथं न स्यात् ॥
>
> —प्रभावकच० दे०प्र० ७६ ॥

वादिकुमुदचन्द्रेण सह वादः


श्रीदेवसूरिर्यदा कर्णावतीं गत्वा वर्षाचतुर्मासीं तस्थौ तदा जयकेशिदेवाख्यस्य कर्णाटनृपतेर्गुरुर्जितानेकसभो मदोद्धुरः कुमुदचन्द्र-नामा दिगम्बरवादी अपि तत्र तस्थिवान् । विविधैरुपायैः कुमुदचन्द्रो देवसूरिं वादाय उत्तेजितवान् । शान्ताऽऽत्मापि देवसूरिस्तन्मद-विनाशाय श्रीपत्तने गुर्जरराजसभायां वादं विधातुं प्रतिज्ञाय कुमुद-चन्द्रं च प्रेर्य शुभे शकुनजाते मुहूर्ते पद्भ्यां प्रयाय पत्तनमा-जगाम ।

---

४३. सर्पाणां राज्ञां च शमने समानधर्मत्वं, मुद्राराक्षसे विशाखादत्तेन द्वितीयाङ्के प्रोक्तं तद् यथा—

> जाणंति तन्तजुत्तिं जहट्ठिअं मंडलं अहिलिहन्ति ।
> जे मन्तरक्खणपरा ते सप्पणराहिवं उवअरन्ति ॥

देवसूरिप्रयाणकुण्डली



कुमुदचन्द्रोऽपि पत्तनमाजिगमवान् । तत्र श्रीसिद्धराजे सभापतौ सति, ११८१ वैक्रमे वर्षे वैशाखपूर्णिमादिने तयोर्वादारम्भः संबभूव । पणबन्धश्चागमजनि—

पणबन्धः

१—वादे यदि कुमुदचन्द्रः पराभूयेत तदा तेन गुर्जरदेशत्यागो विधेयः ।

२—देवसूरिश्चेत् पराभूयेत तदा स गुर्जरदेशीयश्वेताम्बरैः सह दिगम्बरमतमङ्गीकुर्यादिति ।

---

४४. प्रयाणमुहूर्तप्रतिपादकश्लोकस्त्वयं प्रभावकचरित्रे—

ततः सूरिर्दिने शुद्धे मेषलग्ने रवौ स्थिते ।
दशमस्थे शशाङ्के च षष्ठे राहौ रिपुद्रुहि ॥ १३६ ॥

अनेन श्लोकेन ज्ञायते यद्देवसूरिणा [illegible] [illegible] यस्मिन् दिने प्रयाणमकारीति ।

सभ्याः

१ – कुमुदचन्द्रपक्षीया केशवनामानस्त्रयः पण्डिताः सभ्याः आसन्।

२ – सभापतिपक्षीयाः सागर–महर्षि–उत्साह इति नामानस्त्रयो विद्वांसः सभ्या बभूवुः।

३ – देवसूरिपक्षीयौ कविचक्रवर्तिश्रीपालः, भानुश्चासीत्।

वादि-प्रतिवादिसिद्धान्तः

पक्षः	वादिकुमुदचन्द्रस्य	देवसूरेः
स्त्रीमुक्तिः।	न भवति।	भवति।
केवलिभुक्तिः।	,,	,, ।
सवस्त्रस्य मुक्तिः।	,,	,, ।

वादि-प्रतिवादि-सभ्य-सभापतिषु समस्तेषु वादाङ्गेषु सभामलंकुर्वत्सु "भवान् तावत् स्वपक्षं कक्षीकरोतु" इति देवसूरावुक्ते सति दिगम्बराचार्यः कुमुदचन्द्रो राज्ञे प्रथममाशिषं ददौ। तद्यथा—

"खद्योतद्युतिमातनोति सविता जीर्णोर्णनाभालय-
च्छायामाश्रयते शशी मशकतामायान्ति यत्राद्रयः।
इत्थं वर्णयतो नभस्तव यशो जातं स्मृतेर्गोचरं
तद् यस्मिन् भ्रमरायते नरपते! वाचस्ततो मुद्रिताः॥"

पश्चाद् देवसूरिरपि सुन्दरश्लिष्टार्थमाशिषं वितीर्णवान्। तद्यथा—

> " नारीणां विदधाति निर्वृतिपदं श्वेताम्बरप्रोन्मिषत्-
> कीर्तिस्फाति मनोहरं नयपथप्रस्तारभङ्गीगृहम्।
> यस्मिन् केवलिनो न निर्जितपरोत्सेकाः सदा दन्तिनो
> राज्यं तज्जिनशासनं च भवतश्चौलुक्य! जीयाच्चिरम्॥ "

वादारम्भः

ततः पराभवशङ्कासङ्कुचितान्तःकरणः कुमुदचन्द्रः स्वपक्षस्थापनाय स्त्रीमुक्ति-केवलिभुक्ति-सवस्त्रमुक्तिप्रतिषेधकपक्षोपन्यासं कृतवान्। अथ तत्पक्षस्थापनानन्तरं सभापतिप्रार्थितः श्रीदेवसूरिः प्रतिवदितुमारेभे। प्रथमं तु देवसूरिणा कुमुदचन्द्रोपन्यस्तपक्षसाधनादीनि पर्वतशिखराणीव महातार्किकशान्तिसूरिविरचितोत्तराध्ययनसूत्रवृत्तिमनुसृत्य सत्तर्ककर्कशैश्चतुरशीतिविकल्पयुक्तिजालवज्रैरनेकधा खण्डितानि। गरलोज्झितं तं खण्डनप्रकारमवधारयितुमप्यक्षमः। संभ्रान्तचेताः कुमुदचन्द्रः "पुनरुच्यताम्" इति देवसूरिं प्रोक्तवान्। देवसूरिः सम्पूर्णमपि स्वोपन्यासं त्रिवारमावृत्तवान्। ततः उत्तरदानेऽनुत्पन्नप्रतिभः कुमुदचन्द्रो निस्तेजाः सन् मौनं बभार। सभापतिना सन्तुष्य " देवसूरिणा कुमुदचन्द्रो जितः " इत्यनेकवारं हरिताश्रपूर्वकमुद्घोषितम्। सर्वथा परास्तोऽपि दिगम्बराचार्यः कुमुदचन्द्रः स्वकीर्तिरक्षणाय " भवदुपन्यासे प्रोक्ताः कोटाकोटि, कोटिकोटि, कोटीकोटि, इति शब्दाः अशुद्धाः अतः अपशब्दोच्चारणनिग्रहस्थानेन निगृहीतो भवान् इत्यवादीत्, तदैव्या महा-

वैयाकरणेन देवसूरिणा लक्षणसूत्रपुरस्सरमेते त्रयोऽपि शब्दाः संसाधिताः। उत्साहाख्येन विदुषा सभ्येनापि चैते शब्दाः पाणिनेः संमता इत्यनुमोदितम्। तेन स कुमुदचन्द्रः स्वयं निरनुयोज्यानुयोगाख्येन निग्रहस्थानेन निगृहीतः पराजयं प्राप्यातितरां ललज्जे।

राजा सहर्षं धन्यवादप्रदानपूर्वकदेवसूरेर्विजयमसकृत् घोषयाञ्चकार। कुमुदचन्द्रस्य च देशत्यागमादिदेश। वादसमाप्त्यनन्तरं जयपत्रं (Testimony of victory) सम्यग् लेखयित्वा स्वहस्ताक्षरैरलङ्कृत्य बहुमानपूर्वकं श्रीदेवसूरये ददौ। पारितोषिकरूपेण प्रचुरं द्रव्यं छालाप्रभृतिग्रामद्वादशकं चादिदेश, निःस्पृहत्वात् तद् द्रव्यमनिच्छति सूरौ सर्वपरामर्शेन तद् धनं जैनमन्दिरनाभेयजिनमूर्त्तिनिर्माणप्रतिष्ठायां व्ययितवान् राजा।

अयं वादः षोडशदिवसान्ते समाप्तिं प्राप्तः।

ग्रन्थरचना

वादानन्तरं वादिदेवसूरित्वेन प्रसिद्धो देवसूरिरनुभूतं प्रचण्डतर्ककर्कशं सर्वं युक्तिजालं प्रमाणनयतत्त्वालोकस्य स्वोपज्ञव्याख्यारूपे चतुरशीतिसहस्रश्लोकात्मके आकरे स्याद्वादरत्नाकरे ग्रन्थे लोकोपकाराय मनोज्ञभाषया विस्तरतो निबद्धवान्। तत्कालीनैस्तत्पश्चाद्भाविभिः प्रौढैरपि तार्किकैरयं ग्रन्थः मुक्तकण्ठं प्रशंसितोऽभ्यस्तश्च सा... तदतिरिक्ता अन्येऽपि संस्कृत...

ग्रन्था ग्रथिताः । निपुणान्वेषणानन्तरं निम्नोक्ता देवसूरेर्ग्रन्था अस्माभिर्दृष्टाः श्रुताश्च त इमे—

देवसूरिग्रन्थाः

* १ प्रभाते जीवानुशासनम् ।	† ७ कलिकुण्डपार्श्वजिनस्तवनम् ।
* २ मुनिचन्द्राचार्यस्तुतिः ।	८ यतिदिनचर्या (जैनग्रन्थावली)
* ३ गुरुविरहविलापः ।	९ जीवाभिगमलघुवृत्तिः(„)
* ४ द्वादशव्रतस्वरूपम् ।	×१० उपधानस्वरूपम् ।
† ५ कुरुकुल्लादेवीस्तवनम् ।	×११ प्रभातस्मरणस्तुतिः ।
† ६ श्रीपार्श्वधरणोरगेन्द्रस्तवनम् ।	+१२ उपदेशकुलकम् ।
	+१३ संसारोद्विग्नमनोरथकुलकम् ।

नाभिर्भिनत्ति स्तुतिपदविकराविरोद्ग्रन्थकृत्कारणोऽस्तव श्रीमत्समन्तरत्ना-
कर स्याद्वादरत्नाकरप्रमुखाऽनेकशास्त्रसंदर्भानन्तो कां कां न चमत्करोतीति
कोविदानाम् .. । —मुनिसुन्दरसूरिः ।

स्याद्वादरत्नाकरनामधेयं ग्रन्थं महान्तं विदुषां कवीनाम् ।
कृत्वा यशोज्ञानमयं च तत् श्रीदेवसूरिर्नहि भाति लोके ॥मुं०॥

सिद्धान्त वरवादिनां हि वदतः संशोध्य तद्भूषितभिः
वाचस्पतिर्गौतमजन्मतुष्ट्वा ऽनन्तरमादिभिः,
षष्ठे मुखे ... गणदत्तादितो
देवाचार्यगुरो नतो विश्ववनो स्याद्वादरत्नाकरः ॥ मैत्रोपहर ॥

... अपि मुनि ... (पृ० १०)
स्याद्वादरत्नाकरं निर्दिदिष्टः ।

* इतिचिह्नाङ्किता ग्रन्थाः 'प्रकरणसमुच्चये' (ई० सं० १९२१)
मुद्रिताः सन्ति ।

† इतिचिह्नाङ्किताः ग्रन्था मुनिश्रीचतुरविजयैः संपादिताः ।

× इतिचिह्नौ ग्रन्थौ वृद्धिचन्द्र... ।

+ इतिचिह्नौ ग्रन्थौ लिंबडीयाग्रन्थागारे वर्तेते ।

वादिदेवसूरे राजप्रतिबोधकत्वम्

नागपुरीय-आह्लादननृपः, सिद्धराजजयसिंहभूपः, कुमारपाल-पृथ्वीपाल इत्यादयो नैके नृपतयः सूरिणा उपदिष्टा इति ज्ञायते।

वादिदेवसूरेः शिष्याः

तेषां बहवः शिष्याः संबभूवुः। तेषु ज्ञातनामानस्त्वेते—

१ भद्रेश्वरसूरिः। (पट्टधरः)[47]
२ रत्नप्रभसूरिः।[47]
३ माणिक्यः। (मु० कुमुदचन्द्रे)
४ अशोकः। (")
५ विजयसेनः। (")
६ पूर्णदेवाचार्यः।[48]
७ जयप्रभः।[49]
८ पद्मचन्द्रगणिः।[50]
९ पद्मप्रभसूरिः।[51]
१० महेश्वरः।[52]

---

४७. एतौ द्वौ शिष्यौ वादिदेवसूरिणा स्याद्वादरत्नाकरे सहायकत्वेनोल्लिखितौ, स्याद्वादरत्नाकरस्य प्रथमपरिच्छेदान्ते (श्लो० २६४) तथाहि— 'भद्रेश्वरः प्रवरयुक्तिसुधाप्रवाहो रत्नप्रभश्च भजते सहकारिभावम् ॥'

४८. जालोरदुर्गस्थकाञ्चनगिरिशिलालेखः, सं० १२२१ वैक्रमीयः।

४९. प्रबुद्धरौहिणेयनाटके श्लो० ५।

५०. प्राचीनलेखसंग्रहः।

५१. चन्द्रकीर्त्तिकृतसारस्वतटीकाप्रशस्तिश्लो० ३, गच्छमतप्र० पृ० १७५।

५२. श्रीजिनविजयलिखिता कुमारपालप्रतिबोधप्रस्तावना पृ० ३, आवश्यकसप्ततिटीकाकारश्चायम्।

११ गुणचन्द्रः। १३ जयमंगलः। (वृत्तरत्नाकर-टीकायाम्
१२ शालिभद्रः (गच्छमतप्र०) १४ रामचन्द्रः

देवसूरिसमकालीनविद्वांसः

१ हेमचन्द्रसूरिः।	१३ आनन्दसूरिः।
२ रामचन्द्रसूरिः (हेम० शिष्यः)	१४ अजितदेवसूरिः (गुरुभ्राता)
३ गुणचन्द्रसूरिः (,,)	१५ विजयसिंहसूरिः।
४ उदयचन्द्रः (,,)	१६ धर्मघोषः।
५ जिनचन्द्रसूरिः (खरतर ग०)	१७ कमलकीर्तिः।
६ जिनदत्तसूरिः (,,)	१८ श्रीपालः (श्रावकः)
७ जिनपतिसूरिः (,,)	१९ यशःपालः (,,)
८ जिनवल्लभसूरिः (,,)	२० वाग्भटः (मंत्री ,,)
९ जिनभद्रसूरिः।	२१ यशोवीरः (,, ,,)
१० चन्द्रप्रभसूरिः।	२२ उदयनः (,, ,,)
११ हरिभद्रसूरिः (नेमिच० कर्ता)	२३ कुमारपालो (नृपः)
१२ चन्द्राचार्यः।	२४ सिद्धराजजयसिंहो (,,)

वादिदेवसूरेर्मित्राणि

विमलचन्द्र-हरिचन्द्र-सोमचन्द्र-पार्श्वचन्द्र-कुलभूषण-शान्ति-अशोकचन्द्रादयो विपश्चितो देवसूरेर्मित्राणि बभूवुः।

---

४३. हैमविभ्रमटीकाकारः, तत्-प्रशस्तिश्लो० १।

४४. Ipigraphia Indica vol. ix P. 79.

४५. प्रभावक० दे० प्रबन्ध श्लो० ७१।

देवसूरेरन्यत् कार्यजातम्

१ धवलके उदयनकारितसीमंधरमूर्तिप्रतिष्ठा ।[५६]

२ पत्तने महाकविवाग्भटकारितमन्दिरे वीरजिनमूर्तिप्रतिष्ठा ।[५७]

३ पत्तने सिद्धराजभूपकारितमन्दिरे श्रीऋषभजिनप्रतिष्ठा ।[५८]

४ फलवर्द्धिग्रामे जिनचैत्य-बिम्बयोः प्रतिष्ठा कृता ।[५८]

५ आरासणे ग्रामे नेमिनाथजिनमूर्तिप्रतिष्ठा ।[५९]

६ पञ्चत्रिंशत्सहस्र(३५०००)अजैनलोकानां जैनीकरणम् ।[६०]

---

५६. प्रभावकच० दे० प्र० श्लो० ५२ ।

५७. विक्रम सं० ११७६, प्रभावकच० दे० प्र० ७३, अनेन विपश्चिता मन्त्रिणा वाग्भटालङ्कारो रचितः योऽद्यावधि सर्वत्राप्यधीयते ।

५८. प्रभावकच० देवसूरिप्रबन्धश्लो० २७५। इयं प्रतिष्ठा वि० ११८३ वैशाखद्वादशीतिथौ चतुर्भिस्सूरिभिश्चक्रे वादजयतुष्टराजदत्तवित्तेन ।

५९. तपागच्छपट्टावल्यां श्रीधर्मसागरोपाध्यायाः प्रोचुः ।

यत्तु गच्छमतप्रबन्धकर्त्रा (पृ० १४३), फलवर्द्धि-आरासणजिनबिम्बप्रतिष्ठाकर्तृत्वेन, स्याद्वादरत्नाकररचयितृत्वेन च श्रीअजितदेवसूरेर्नाम लिखितं तद्भ्रान्तमेवावसेयम्, प्रमाणेतिहासबाधितत्वात् ।

"Extracts from the Historical Records of the Jains by Johannes klatt, Ph. D. of Berlin published in the Indian Antiquary of Sept. 1882.

६०. गच्छमतप्रबन्धे पृ० १७४ ।

वादिदेवसूरिस्तुतिः

वचप्रतिष्ठाचार्याय नमः श्रीदेवसूरये ।
यत्प्रसादमिवाभाति सुखप्रश्नेषु दर्शनम् ॥ प्रद्युम्नसूरिः ।

वादविद्यावतोऽपापि छलशालामनुज्झता ।
देवसूरिप्रभोः साम्यं कथं स्याद् देवसूरिणा ? ॥ मुनिदेवः ।

यदि नाम कुमुदचन्द्रं नाऽजेष्यद् देवसूरिरहिमरुचिः ।
कटिपरिधानमधारयत् कतमः श्वेताम्बरो जगति ? ॥ हेमचन्द्रसूरिः ।

अस्तां सुधा किमधुना मधुना विधेयं
दूरे सुधानिधिरलं नवगोस्तनीभिः ।
श्रीदेवसूरिसुगुरोर्यदि सूक्तयस्ताः
पाकोत्तराः श्रवणयोरतिथीभवन्ति ॥ यशश्चन्द्रः ।

यैस्तु स्वप्रभया दिगम्बरस्यार्पिता पराभूतिः ।
प्रत्यक्षं विबुधानां जयन्तु ते देवसूरयो नम्याः ॥ रत्नप्रभसूरिः ।

श्रीमद्देवगुरौ सिंहासनस्थे सति भास्वति ।
प्रतिष्ठायां न लग्नानि कुशानि महतामपि ॥ प्रभाचन्द्रसूरिः ।

वादीन्द्रस्मयसङ्गरस्मयचणः श्रीदेवसूरिः प्रभुः....॥ रामभद्रमुनिः ।

कृत्वा ग्रन्थान् चारुस्याद्वादपूर्णान्
विद्वन्मान्यान् दुर्गमान् श्रीतिदेतून् ।
हत्वा मानं सर्वविद्वज्जनानां
स्यातः स्मरणो देवसूरिर्बभूव" ॥ संशोधकः ।

---

१. अयं श्लोकः सुभाषितरत्नभाण्डागारे कविप्रशंसायां मुद्रितः । पृ० २,८५

वादिदेवसूरिनिर्वाणम्

एवं वादोपदेशशक्त्या चेतस्विचेतश्चमत्कारिग्रन्थरचनया गुणिगणगण्यगुणगणेन च प्राप्तपुण्ययशा देवसूरिर्भद्रेश्वरसूरये गच्छभारं समर्प्य ८३ वर्षमितमायुः संपाल्य समाधिपूर्वकं विक्रमीये १२२६ वर्षे श्रावणकृष्णसप्तम्यां तिथौ मर्त्यलोकं विहाय अमर्त्यलोकमलङ्करीकरीति स्मेति **वादिदेवसूरिचरित्रसंक्षेपः** ।

टिप्पणीपरिचयः

राजकीयकलकत्ताऽऽदिमहाविद्यालयेषु (University) M. A. परीक्षायां, न्यायप्रथमादिपरीक्षासु, अन्यासु बह्वीषु पाठशालासु च पाठ्यग्रन्थत्वेनायं ग्रन्थो निर्धारितोऽस्ति, अतः श्रीयुतपं० हरिसत्यभट्टाचार्यप्रमुखैरस्य आङ्ग्ल-गूर्जरादिभाषास्वनुवादोऽपि विहित इति श्रूयते ।

अयं मूलसूत्रबद्धो ग्रन्थस्तु पुरा नातिसंस्कृतोऽशुद्धश्च प्रकटीबभूव बहुकालतश्च तदनुपलब्धिर्जाताऽतः पिपठिषूणामप्राप्योऽजनि। तस्मादस्य ग्रन्थस्योपरि संस्कृतभाषायामपि न्याय-मीमांसाद्यनेकदर्शनव्याप्तमेधैः शुक्लोपाह्वश्रीमत्पण्डितरामगोपालाचार्यैर्बालबोधिनी नाम्नी छात्रोपयोगिनी नातिलघीयसी सरला टिप्पणी व्यरचि । अस्यां टिप्पण्यां श्रीरत्नाकरावतारिकादिग्रन्थानवलम्ब्य तैः शब्दार्थाभ्यां सूत्रार्थस्स्पष्टितः। परीक्षामुखे प्रमेयरत्नमालेव छात्रेभ्योऽवश्यमुपकरिष्यतीयमिति मे मतिः।

---

६२. प्रभावकच० दे० प्र० श्लो० २८३, २८४, २८७ ।

सम्पूर्णटिप्पणीसम्पादनम्

प्रस्तुतटिप्पणीयुक्तस्य प्रमाण-नयतत्त्वालोकस्य सम्पादने व्याख्यातृचूडामणिभिः सूरीश्वरसम्राट्प्रभृतिलेखकैः 'प्राचीनलेखसंग्रह-विजयधर्मसूरिस्मारकग्रन्थ'प्रभृतिग्रन्थसम्पादकैः पूज्यश्रीविद्याविजयपादैरहमादिष्टः । तेषामादेशमङ्गीकृत्य मयाऽस्याः बालबोधिन्याः टिप्पण्या मूलग्रन्थस्य च यथामति यथाशक्ति च संशोधनं सम्पादनं च कृतमस्ति, अतस्तेषामनुग्रहं मन्ये ।

अत्राऽऽवृत्तौ मूलसूत्राणि तु श्रीरत्नाकरावतारिकास्थमूलसूत्रपाठानुसारेण संगृह्य संपादितानि । पूर्वमुद्रितमूलसूत्रग्रन्थे स्याद्वादरत्नाकरान्तर्मुद्रितसूत्रेषु च प्रायः प्रत्येकसूत्रप्रान्ते "इति" इति पदं मुद्रितं दृश्यते,[13] परन्तु विचार्यमाणायां सूत्रपद्धत्यां मुद्रणपद्धत्यां च सर्वत्र "इति" इति पदं निरर्थकमसुन्दरं च प्रतिभाति । केषुचिद् मुद्रितपुस्तकेषु च सर्वत्र "इति" पदस्यानुपलब्धेरस्माभिर्नात्र तत् सम्पादितम् । यत्र तु रत्नाकरावतारिकायामावश्यकत्वाद् वर्तते तत्तु अस्मिन् संपादनेऽपि [14]मुद्रितमेव यथास्थानम् । पिपठिषूणां यथावश्यकं च तत्र तत्र स्थले पत्राधोभागेऽस्माभिः टिप्पणानि संदृब्धानि । आगरास्थश्रीविजयधर्मलक्ष्मीज्ञानमन्दिरस्य हस्तलिखितपुस्तकद्वयात् पाठान्तराणि, [15]विषयानु-

---

१३. यथा—'प्रमाणनयतत्त्वव्यवस्थापनार्थमिदमुपक्रम्यते इति । ॥ १-१ ॥ स्वपरव्यवसायिज्ञानं प्रमाणमिति ॥ २ ॥ इत्यादि ।

१४. यथा परि० ४-२१, प० ६-३६, परि० ७-१२. ।

१५. अनुक्रमसंख्या (नं) २५०२, एकादशपत्रात्मकं पुस्तकं क संज्ञकम् । अनुक्रमसंख्या (नं.) २०५०३ पत्रात्मकं पुस्तकं ख संज्ञकम् ।

वादिदेवसूरिनिर्वाणम्

एवं वादोपदेशशक्त्या चेतश्चिचेतश्चमत्कारिग्रन्थरचनया गुणिगणगण्यगुणगणेन च प्राप्तपुण्ययशा देवसूरिर्भद्रेश्वरसूर्ये गच्छभारं समर्प्य ८३ वर्षमितमायुः संपाल्य समाधिपूर्वकं विक्रमीये १२२६ वर्षे श्रावणकृष्णसप्तम्यां तिथौ मर्त्यलोकं विहाय अमर्त्यलोकमलङ्करीकरोति स्मेति वादिदेवसूरिचरित्रसंक्षेपः।

टिप्पणीपरिचयः


राजकीयकलकत्ताऽऽदिमहाविद्यालयेषु (University) M. A. परीक्षायां, न्यायप्रथमादिपरीक्षासु, अन्यासु बह्वीषु पाठशालासु च पाठ्यग्रन्थत्वेनायं ग्रन्थो निर्धारितोऽस्ति, अतः श्रीयुतपं० हरिसत्यभट्टाचार्यप्रमुखैरस्य आङ्ग्ल-गूर्जरादिभाषास्वनुवादोऽपि विहित इति श्रूयते।

अयं मूलसूत्रबद्धो ग्रन्थस्तु पुरा नातिसंस्कृतोऽशुद्धश्च प्रकटीबभूव बहुकालतश्च तदनुपलब्धिर्जाताऽतः पिपठिषूणामप्राप्योऽजनि। तस्मादस्य ग्रन्थस्योपरि संस्कृतभाषायामपि न्याय-मीमांसाद्यनेकदर्शनव्याप्तमेधैः शुक्लोपाह्वश्रीमत्पण्डितरामगोपालाचार्यैर्बालबोधिनी नाम्नी छात्रोपयोगिनी नातिलघीयसी सरला टिप्पणी व्यरचि। अस्यां टिप्पण्यां श्रीरत्नाकरावतारिकादिग्रन्थानवलम्ब्य तैः शब्दार्थाभ्यां सूत्रार्थस्स्पष्टितः। परीक्षामुखे प्रमेयरत्नमालेव छात्रेभ्योऽवश्यमुपकरिष्यतीयमिति मे मतिः।

---

६२. प्रभावकच० दे० प्र० श्लो० २८३, २८४, २८७।

मूलग्रन्थस्य विषयानुक्रमः ।



श्रीदेवसूरिर्निजबुद्धिशक्त्या जिष्णुर्गुणित्वेन च देवसूरिम् ।
देवाधिदेवं स्मृतिवर्त्म तावन्नयं नयी ग्रन्थमुपक्रमेत ॥ १ ॥

प्रथमे परिच्छेदे ।

प्रमाणलक्षणं सम्यक् परीक्ष्यार्थस्वरूपणम् ।
प्रामाण्यमादिमे चोक्तं परिच्छेदे सुयुक्तितः ॥ २ ॥

द्वितीये परिच्छेदे ।

भित्त्वाऽऽद्यां प्रमितिं द्वेधा प्रत्यक्षं च सलक्षणम् ।
तद्भेदान् प्रोच्य लौकिकाऽलौकिकांश्चालिखत् ततः ॥ ३ ॥

तृतीये परिच्छेदे ।

सस्वरूपाः परोक्षस्य पञ्चोपलब्धिलक्षिताः ।
सानुपलब्ध्युदाहारास्तृतीयेऽकथयद् भिदाः ॥ ४ ॥

चतुर्थे परिच्छेदे ।

मुख्यतान् तु श्रुताऽऽगमस्याप्तस्यान् तुर्ये पृथक् श्रुतम् ।
आप्तवर्णपदादींश्च सप्तभङ्गीमवर्णयत् ॥ ५ ॥



जगत्पूज्यश्रीविजयधर्मसूरिभ्यो नमः ।

श्रीवादिदेवसूरिविरचितः

प्रमाणनयतत्त्वालोकः

प्रथमः परिच्छेदः ।

ग्रन्थकारस्य मङ्गलाचरणम्—

रागद्वेषविजेतारं ज्ञातारं विश्ववस्तुनः ।
शक्रपूज्यं गिरामीशं तीर्थेशं स्मृतिमानये ॥ १ ॥

टिप्पणीकारस्य मङ्गलाचरणम्—

नत्वा गुरुक्रमाम्भोजं स्मृत्वा सर्वेश्वरं विभुम् ।
टिप्पणी बालबोधाय लिख्यते पाठ्भाषया ॥

अथ तत्रभवन्तः पूज्यपादाः सकलकवितार्किकचक्रवर्तित्वेन विश्रुताः श्रीवादिदेवसूरयः प्रारिप्सितग्रन्थनिर्विघ्नपरिसमाप्तये इष्टदेवतानमस्कारात्मकं इदं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नन्ति रागद्वेषेति—

अहं, तीर्थेशं—तीर्थः—साधु-साध्वी-श्रावक-श्राविका इत्येवंरूप-चतुर्विधश्रमणसंघस्तस्येशं—स्वामिनं, स्मृतिं स्मरणम्, आनये—प्रापयामि-स्मरामीत्यर्थः । कीदृशं तीर्थेशम्? रागद्वेषविजेतारं—रागद्वेषयोर्विशेषेण-अपुनर्भवतारूपेण जेतारं—जयनशीलम्, "तृन्" इत्यनेन ताच्छील्ये तृन्,

तथा विश्ववस्तुनः—त्रिभुवनवर्त्तिसामान्यविशेषात्मकस्य पदार्थजातस्य ज्ञातारं—अवबोद्धारम्, शक्रपूज्यं—शक्राणां—इन्द्राणां पूज्यं—पूजनीयम्, गिरामीशं - गिरां—वाणीनामीशं—स्वामिनम्, यथावस्थितवस्तुविषयत्वेनैतासां प्रयोक्तृत्वात्। अनेन विशेषणचतुष्टयेन भगवतश्चत्वारो मूलातिशयाः प्रतिपादिताः। तथाहि—अपायापगमातिशयः, ज्ञानातिशयः, पूजातिशयः, वागतिशयश्चेति।

ननु निर्विघ्नग्रन्थसमाप्तिं प्रति मङ्गलस्य कथं कारणत्वम्? विनापि मङ्गलं **किरणावल्यादौ** ग्रन्थपरिसमाप्तिदर्शनाद् व्यतिरेकव्यभिचारस्य, **कादम्बर्यादौ** कृतेऽपि मङ्गले समाप्त्यभावादन्वयव्यभिचारस्य च विद्यमानत्वात्, तस्मादनारम्भणीयं मङ्गलमिति चेत्, न, **किरणावल्यादौ** ग्रन्थाद् बहिरेव मङ्गलस्य कृतत्वाद् विघ्नात्यन्ताभावाद् वा ग्रन्थसमाप्तिसम्भवात्, **कादम्बर्यादौ** तु कृतेऽपि मङ्गले विघ्नबाहुल्याद् विघ्नानुरूपस्य मङ्गलस्याभावाद् वा समाप्त्यभावान्नान्वयव्यतिरेकव्यभिचारः, तस्मान्मङ्गलनिर्विघ्नग्रन्थसमाप्त्योः कार्यकारणभावे न काऽपि क्षतिरिति दिक्।

[1]प्रमाणनयतत्त्वव्यवस्थापनार्थमिदमुपक्रम्यते ॥ १ ॥

प्रकर्षेण—संशयादिराहित्येन मीयते—ज्ञायते यत् तत् प्रमाणम्, नीयते—गम्यते श्रुतप्रमाणपरिच्छिन्नैकदेशोऽनेनेति नयः, प्रमाणं च नयश्चेति प्रमाणनयौ, प्रमाणपदस्य बह्वच्त्वेऽपि अभ्यर्हितत्वात् पूर्वनिपातः, प्रमाणनययोस्तत्त्वं—स्वरूपं प्रमाणनयतत्त्वम्, तस्य व्यवस्थापनं

---

१. अथ प्रमाण० क।

जगत्पूज्यश्रीविजयधर्मसूरिभ्यो नमः ।

श्रीवादिदेवसूरिविरचितः

प्रमाणनयतत्त्वालोकः

प्रथमः परिच्छेदः ।

ग्रन्थकारस्य मङ्गलाचरणम्—

> रागद्वेषविजेतारं ज्ञातारं विश्ववस्तुनः ।
> शक्रपूज्यं गिरामीशं तीर्थेशं स्मृतिमानये ॥ १ ॥

टिप्पणीकारस्य मङ्गलाचरणम्—

> नत्वा गुरुकमाम्भोजं स्मृत्वा सर्वेश्वरं विभुम् ।
> टिप्पणी बालबोधाय लिख्यते बालभाषया ॥

अथ तत्रभवन्तः पूज्यपादाः सकलतार्किकचक्रचक्रवर्तित्वेन विश्रुताः श्रीवादिदेवसूरयः प्रारिप्सितग्रन्थनिर्विघ्नपरिसमाप्तये इष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नन्ति रागद्वेषेति—

[illegible]—तीर्थं:—साधु-साध्वी-श्रावक-श्राविका रूपचतुर्विध-[illegible] तीर्थेशं—स्वामिनं, स्मृतिं स्मरणम्, आनये—प्रापयामि-करोमि इत्यर्थः ? रागद्वेषविजेतारं—रागद्वेषयोर्विजेतारं-[illegible] जेतारं—जयनशीलम्, "तृन्" इत्यनेन ताच्छील्ये तृन्,

सप्तमे परिच्छेदे

अष्टमे परिच्छेदे



जगत्पूज्यश्रीविजयधर्मसूरिभ्यो नमः ।

श्रीवादिदेवसूरिविरचितः

प्रमाणनयतत्त्वालोकः

प्रथमः परिच्छेदः ।

ग्रन्थकारस्य मङ्गलाचरणम्—

रागद्वेषविजेतारं ज्ञातारं विश्ववस्तुनः ।
शक्रपूज्यं गिरामीशं तीर्थेशं स्मृतिमानये ॥ १ ॥

टिप्पणीकारस्य मङ्गलाचरणम्—

नत्वा गुरुक्रमाम्भोजं स्मृत्वा सर्वेश्वरं विभुम् ।
टिप्पणी बालबोधाय लिख्यते बालभाषया ॥

अथ तत्रभवन्तः पूज्यपादाः सकलतार्किकचक्रचक्रवर्तित्वेन विश्रुताः श्रीवादिदेवसूरयः प्रारिप्सितग्रन्थनिर्विघ्नपरिसमाप्तये इष्टदेवतानमस्कारात्मकं इदं मङ्गलं शिष्यशिक्षायै ग्रन्थादौ निबध्नन्ति रागद्वेषेति—

अहं तीर्थेशं—तीर्थः—साधु-साध्वी-श्रावक-श्राविका इत्येवंरूप-चतुर्विधश्रमणसंघस्तस्य ईशं—स्वामिनं, स्मृतिं स्मरणम्, आनये—प्रापयामि-स्मरामीत्यर्थः । कीदृशं तीर्थेशम् ? रागद्वेषविजेतारं—रागद्वेषयोर्विशेषेण-अपुनर्भवतारूपेण जेतारं—जयनशीलम्, 'तृन्' इत्यनेन ताच्छील्यम्,

तथा विश्ववस्तुनः—त्रिभुवनवर्त्तिसामान्यविशेषात्मकस्य पदार्थजातस्य ज्ञातारं—अवबोद्धारम्, शक्रपूज्यं—शक्राणां—इन्द्राणां पूज्यं—पूजनीयम्, गिरामीशं-गिरां—वाणीनामीशं—स्वामिनम्, यथावस्थितवस्तुविषयत्वेनैतासां प्रयोक्तृत्वात्। अनेन विशेषणचतुष्टयेन भगवतश्चत्वारो मूलातिशयाः प्रतिपादिताः। तथाहि—अपायापगमातिशयः, ज्ञानातिशयः, पूजातिशयः, वागतिशयश्चेति।

ननु निर्विघ्नग्रन्थसमाप्तिं प्रति मङ्गलस्य कथं कारणत्वम्? विनापि मङ्गलं **किरणावल्यादौ** ग्रन्थपरिसमाप्तिदर्शनाद् व्यतिरेकव्यभिचारस्य, **कादम्बर्यादौ** कृतेऽपि मङ्गले समाप्त्यभावादन्वयव्यभिचारस्य च विद्यमानत्वात्, तस्मादनारम्भणीयं मङ्गलमिति चेत्, न, **किरणावल्यादौ** ग्रन्थाद् बहिरेव मङ्गलस्य कृतत्वाद् विघ्नात्यन्ताभावाद् वा ग्रन्थसमाप्तिसम्भवात्, **कादम्बर्यादौ** तु कृतेऽपि मङ्गले विघ्नबाहुल्याद् विघ्नानुरूपस्य मङ्गलस्याभावाद् वा समाप्त्यभावान्नान्वयव्यतिरेकव्यभिचारः, तस्मान्मङ्गलनिर्विघ्नग्रन्थसमाप्त्योः कार्यकारणभावे न काऽपि क्षतिरिति दिक्।

[1]प्रमाणनयतत्त्वव्यवस्थापनार्थमिदमुपक्रम्यते ॥ १ ॥

प्रकर्षेण—संशयादिराहित्येन मीयते—ज्ञायते यत् तत् प्रमाणम्, नीयते—गम्यते श्रुतप्रमाणपरिच्छिन्नैकदेशोऽनेनेति नयः, प्रमाणं च नयश्चेति प्रमाणनयौ, प्रमाणपदस्य बह्वच्त्वेऽपि अभ्यर्हितत्वात् पूर्वनिपातः, प्रमाणनययोस्तत्त्वं—स्वरूपं प्रमाणनयतत्त्वम्, तस्य व्यवस्थापनं

१. अथ प्रमाण० क।

प्रमाणनयतत्त्वव्यवस्थापनम्, तदेव प्रयोजनं यत्र तत् प्रमाणनय-
तत्त्वव्यवस्थापनार्थम्, क्रियाविशेषणमेतद्, न तु, इदंशब्दनिर्दिष्टस्य
शास्त्रस्य, तस्य करणत्वेनैव तत्रोपयोगात्। इदं-बुद्धौ प्रतिभासमानं
शास्त्रमुपक्रम्यते-बहिःशब्दरूपतया प्रारभ्यते। "प्रयोजनमनुद्दिश्य
मन्दोऽपि न प्रवर्तते" इति न्यायेन प्रयोजनमन्तरा प्रेक्षावत्प्रवृत्त्यनुप-
लम्भादिदमादिवाक्यं प्रयोजनं प्रतिपादयितुं शास्त्रादावुपन्यस्तम्। अत्र
बौद्धाः वदन्ति-इदमादिवाक्यं प्रयोजनमभिधातुं नाऽलम्, प्रयोजन-
गोचरसंशयोत्पादकत्वेनैव तस्य चरितार्थत्वादिति। तदसत्, आदिवाक्यं
विनैव शास्त्रमात्रावलोकनेनापि इदं शास्त्रं सप्रयोजनमप्रयोजनं
वा? इति प्रयोजनभावाभावपरः संशयः समाविर्भवति, तथा च
न तदर्थमादिवाक्यमावश्यकम्, अपि तु प्रयोजनप्रतिपादकत्वेनैव
सप्रयोजनमिति मन्तव्यम् ॥ १ ॥

स्वपरव्यवसायि ज्ञानं प्रमाणम् ॥ २ ॥

स्वम्-ज्ञानस्वरूपम्, परः-ज्ञानाद् भिन्नोऽर्थः, स्वं च परश्चेति
स्वपरौ, तौ विशेषेण व्यवस्यति-निश्चिनोतीत्येवं शीलं यस्य तत् स्वपर-
व्यवसायि। ज्ञायते प्राधान्येन विशेषो गृह्यतेऽनेनेति ज्ञानम्, (वस्तुनः
वस्तुनः सामान्यविशेषात्मकत्वाद्, यदा ग्राहकं ज्ञानं विशेषांशं गौणीकृत्य
सामान्यांशं प्राधान्येन गृह्णाति तदा तद् दर्शनपदेनाभिधीयते, यदा
सामान्यांशं गौणीकृत्य विशेषांशं प्रधानरूपतया गृह्णाति तदा तद्
ज्ञानपदेनोच्यते) अत्र प्रमाणं लक्ष्यम्, स्वपरव्यवसायित्वे सति
ज्ञानत्वं लक्षणम्, असाधारणधर्मो हि लक्षणम्, असाधारणत्वं च लक्ष्य-
तावच्छेदकसमनियतत्वम्। लक्षणस्य त्रीणि दूषणानि सन्ति, अव्याप्त्य-

तिव्याप्त्यसंभवभेदात्, तत्र लक्ष्यैकदेशावृत्तित्वमव्याप्तिः, यथा–'गोः कपिलत्वं लक्षणम्' इत्युक्ते श्वेतगवादौ भवत्यव्याप्तिः, श्वेतगवि कपिलत्वस्याभावात्। लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वमतिव्याप्तिः, यथा 'शृङ्गित्वं गोर्लक्षणम्' इत्युक्ते महिषादावतिव्याप्तिः, शृङ्गित्वरूपधर्मस्य तत्रापि विद्यमानत्वात्। लक्ष्यमात्रावृत्तित्वमसम्भवः, यथा 'एकशफवत्वं गोर्लक्षणम्' इत्युक्ते गोमात्रस्यैकशफवत्त्वाभावादसम्भवः। सास्नादिमत्त्वं गोत्वमिति तु दूषणत्रयरहितं लक्षणम्।

एवमिदमपि प्रमाणलक्षणं दूषणत्रयरहितत्वान्निरवद्यम्, तथाहि–प्रमाणमात्रे लक्षणस्य सत्त्वान्नाव्याप्तिः, अप्रमाणतो व्यावृत्तत्वान्नातिव्याप्तिः, लक्ष्यमात्रे लक्षणस्य विद्यमानत्वादेव नासम्भवः।

ज्ञानं प्रमाणमित्युक्ते संशयादावतिव्याप्तिः स्याद् अतः स्वपरव्यवसायीति पदम्, नैयायिकाभिमतस्य जडस्वरूपस्य सन्निकर्षादेः स्वसमयप्रसिद्धस्य सन्मात्रविषयस्य दर्शनस्य च प्रामाण्यनिराकरणार्थं ज्ञानमिति पदम्, बौद्धैः परिकल्पितस्य निर्विकल्पस्य प्रामाण्यव्यवच्छेदार्थं व्यवसायीति पदम्, **ज्ञानाद्वैतवादिनां** मतमत्यसितुं परेति, **नित्यपरोक्षज्ञानवादिनां मीमांसकानाम्, एकात्मसमवायिज्ञानान्तरप्रत्यक्षवादिनां नैयायिकानाम्, अचेतनज्ञानवादिनां सांख्यानां** च मतं निराकर्तुं स्वेति। समग्रलक्षणं तु–"अर्थोपलब्धिः प्रमाणम्" इत्यादीनां परपरिकल्पितानां लक्षणानां व्यवच्छेदार्थमिति दिक्॥ २॥

अभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमं हि प्रमाणमतो ज्ञानमेवेदम्॥ ३॥

अभिमतमुपादेयं, अनभिमतं—हेयम् । प्रयोगश्च—प्रमाणं ज्ञानमेव अभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमत्वात्, यन्न ज्ञानं तन्नाभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमं, यथा स्तम्भादि, अभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमं च प्रमाणम्, अतो ज्ञानमेवेदम् ॥ ३ ॥

न वै सन्निकर्षादेरज्ञानस्य प्रामाण्यमुपपन्नं तस्यार्थान्तरस्येव स्वार्थव्यवसितौ साधकतमत्वानुपपत्तेः ॥ ४ ॥

अज्ञानस्य—जडस्वरूपस्य सन्निकर्षादेः—इन्द्रियार्थसम्बन्धादेः प्रामाण्यं नोपपद्यते, तस्य—सन्निकर्षादेः, अर्थान्तरस्येव घटादेरिव, स्वार्थव्यवसितौ—स्वार्थनिश्चितौ, साधकतमत्वानुपपत्तेः—करणत्वानुपपत्तेः ।

अयमर्थः—यथा घटो जडत्वात् स्वनिश्चये अर्थनिश्चये च साधकतमो न भवति, तथैव इन्द्रियविषयसम्बन्धरूपः सन्निकर्षोऽपि स्वनिश्चये अर्थनिश्चये च करणं न भवितुमर्हति, जडत्वादेव ।

प्रयोगश्च—सन्निकर्षादिर्न प्रमाणं स्वार्थव्यवसितावसाधकतमत्वात्, यत् स्वार्थव्यवसितावसाधकतमं तन्न प्रमाणं, यथा घटः, स्वार्थव्यवसितावसाधकतमश्च सन्निकर्षादिस्तस्मान्न प्रमाणम् ।

नैयायिकाः प्रमाणं प्रति सन्निकर्षस्य प्रामाण्यमङ्गीकुर्वन्ति, तस्माद्—तेषां मते सन्निकर्षः षोढा—संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति ।

तत्र चक्षुषा घटग्रहणे संयोगः सन्निकर्षः । घटरूपग्रहणे संयुक्तसमवायः, चक्षुःसंयुक्तो घटः तत्र रूपस्य समवायात् । रूपत्वग्रहणे संयुक्तसमवेतसमवायः, चक्षुःसंयुक्तो घटः तत्र समवेतं रूपं तत्र

कथं तर्हि तस्य प्रामाण्यम् ? उत्तरकालभाविनो व्यवहारजननसामर्थ्याद् विकल्पात् तस्य प्रामाण्याभ्युपगमापेक्षया वरं विकल्पस्यैव प्रामाण्याभ्युपगमः। किञ्च, भवन्मते सविकल्पं विज्ञानं स्वयमप्रमाणभूतम्, तथा सति कथं तद् निर्विकल्पकस्य प्रामाण्यव्यवस्थापकं भवेदिति यत् किञ्चिदेतत्। तस्मात् प्रमाणभूतं ज्ञानं व्यवसायस्वभावमेवाभ्युपगन्तव्यं, न निर्विकल्पकमिति भावः ॥ ७ ॥

अतस्मिंस्तदध्यवसायः समारोपः ॥ ८ ॥

तदभाववति तत्प्रकारकं ज्ञानं समारोपः, अयथार्थज्ञानमिति यावत् ॥ ८ ॥

स विपर्यय-संशयानध्यवसायभेदात् त्रेधा ॥ ९ ॥

विपरीतैककोटिनिष्टङ्कनं विपर्ययः ॥ १० ॥

येनाकारेण वस्तु स्थितं तद्विपरीतैकाकारेण तस्य निश्चयनं विपर्ययः ॥ १० ॥

यथा शुक्तिकायामिदं रजतमिति ॥ ११ ॥

शुक्तिकायामरजताकारायां रजताकारेण यज्ज्ञानं स विपर्ययः—विपरीतख्यातिरित्यर्थः।

ख्यातयो बहुविधाः, यथा—आत्मख्यातिः, असत्ख्यातिः, अख्यातिः, अनिर्वचनख्यातिः, सत्ख्यातिः, अन्यथाख्यातिश्चेति। तत्र—आत्मख्यातिः—आत्मनः ज्ञानस्यैव ख्यातिः—विषयरूपतया भानम्, अयमर्थः—'शुक्ताविदं रजतम्' इत्यत्र ज्ञानस्यैव रजतरूपतया भानं भवति, न च तत्र कश्चिद् बाह्योऽर्थो विद्यते, 'अयं घटः' इत्यादिषु

सर्वत्र ज्ञानस्यैव विषयरूपतया प्रतिभासमानत्वात्, इति योगाचारा-परपर्यायविज्ञानवादिनो बौद्धाः ।

असत्ख्यातिः—असतो रजतादेः ख्यातिः—प्रतीतिः तथाहि—'शुक्ताविदं रजतम्' इतिप्रतिभासमानं वस्तु न ज्ञानरूपं भवितुमर्हति 'अहं रजतम्' इति अन्तर्मुखाकारतयाऽप्रतिभासमानत्वात्, नाप्यर्थरूपम्, रजतसाध्याया अर्थक्रियाया अभावात्. तस्मादसदेव रजतं तत्र चकास्तीत्यसत्ख्यातिरिति माध्यमिकापरपर्यायशून्यवादिनो बौद्धाः ।

अख्यातिरप्रतीतिः—विवेकाख्यातिरित्यर्थः । शुक्ताविदं रजतमित्यत्र प्रत्यक्षस्मरणरूपं ज्ञानद्वयमुत्पद्यते, तत्रेदमंशः प्रत्यक्षस्य विषयः, हट्टस्थादिरजतं तु स्मरणस्य विषयः, तयोः—प्रत्यक्षस्मरणयोः शुक्तिरजतयोश्चेन्द्रियदोषवशाद् भेदग्रहणं न भवतीति भेदा(ऽविवेका)ऽख्यातिरिति मीमांसकाः ।

अनिर्वचनीयख्यातिर्नाम सत्त्वेनासत्त्वेन चानिर्वचनीयस्य रजतादेः ख्यातिः—प्रतीतिः । तथाहि—'शुक्ताविदं रजतम्, इत्यत्र रजतं न सत्' बाध्यमानत्वात्, यतो न बाध्यमानत्वं यथा सत्यरजतम्, नाप्यसत् प्रतीयमानत्वात् असत् न प्रतीयते वन्ध्यास्तनन्धयवत्, तस्मादनिर्वचनीयमतोऽनिर्वचनीया, इति अद्वैतवेदान्तिनः ।

सत्ख्यातिर्नाम सतो—विद्यमानस्य पदार्थस्य ख्यातिः—प्रतीतिः, तथाहि—'शुक्ताविदं रजतम्' इत्यत्र शुक्तौ विद्यमानस्यैव रजतांशस्य प्रतीतिः "सर्वत्र सर्वं सत् सर्वं सर्वैकदेशगात्" इति नियमात् पञ्चीकरणप्रक्रियया च तत्र रजतांशस्य विद्यमानत्वात् । अतएवास्याः स

भूयसामपि शुक्त्यंशानां न प्रतीतिः, स्वल्पानामपि रजतांशानां प्रतीतिर्भवति, अतः 'शुक्तौ इदं रजतम्' इति ज्ञानं यथार्थमेव, तत्र ज्ञानविषयस्य विद्यमानत्वात्, विषयव्यवहारबाधात् तु भ्रमत्वेन व्यवहार इति **विशिष्टाद्वैतवेदान्तिनः** ।

अन्यथाख्यातिः—अन्यथा स्थितस्य वस्तुनोऽन्यरूपेण प्रतीतिः, तथाहि—अन्यथा स्थितस्य शुक्त्यादिरूपस्यार्थस्यान्यथा-रजतादिरूपेण प्रतिभासनमन्यथा-(विपरीत-)ख्यातिरिति **जैनाः नैयायिकाश्च** ।

एतासां खण्डनमण्डनप्रकारस्तु जिज्ञासुभिः **स्याद्वादरत्नाकराद्**वसेयः, ग्रन्थविस्तरभिया नात्र प्रपञ्च्यते ॥ ११ ॥

साधकबाधकप्रमाणाभावादनवस्थितानेककोटिसंस्पर्शि ज्ञानं संशयः ॥ १२ ॥

साधकप्रमाणाभावात् बाधकप्रमाणाभावाच्चानिश्चितानेकांशावगाहि ज्ञानं संशय इत्यर्थः ॥ १२ ॥

यथाऽयं स्थाणुर्वा पुरुषो वा ॥ १३ ॥

प्रत्यक्षविषये धर्मिणि दूरादूर्ध्वतादिसाधारणधर्मदर्शनेन वक्त्रकोटरादिकरचरणादिविशेषधर्मस्मरणे सति एकतरनिश्चायकसाधकबाधकप्रमाणाभावाद् दोलायमानं 'स्थाणुर्वा पुरुषो वा ?' इत्याकारकं यज्ज्ञानं प्रादुर्भवति स संशयः, अयं प्रत्यक्षविषयः । अनुमानविषयस्तु क्वचिद् वनप्रदेशे शृङ्गमात्रावलोकनेन भवति संशयः, 'अयं गौर्वा स्याद् गवयो वा ?' इति ॥ १३ ॥

किमित्यालोचनमात्रमनध्यवसायः ॥ १४ ॥

यत्र विशेषस्य स्पष्टतया भानं न भवति, अपि तु किमित्या-लोचनात्मकं ज्ञानं भवति सोऽनध्यवसाय इत्युच्यते ॥ १४ ॥

यथा गच्छत्तृणस्पर्शज्ञानम् ॥ १५ ॥

यथा गच्छतः पुरुषस्यान्यत्राऽऽसक्तचित्तस्य तृणस्पर्शे जाते एवं जातीयकं एवं नामकमित्यादि विशेषरूपेणावधारणं न भवति, अपि तु 'मया किमपि स्पृष्टम्' इत्याकारकमालोचनात्मकं यज्ज्ञानं भवति सोऽनध्यवसाय इत्युच्यते। प्रत्यक्षविषयश्चायमनध्यवसायः। परोक्ष-विषयस्तु कस्यचिदपरिज्ञातगोजातीयस्य पुंसः क्वचन वननिकुञ्जे सास्नामात्रावलोकनेन पिण्डमात्रमनुमाय 'कोनु खल्वत्र प्राणी स्यात्?' इत्यादि ॥ १५ ॥

ज्ञानादन्योऽर्थः परः ॥ १६ ॥

ज्ञानाद् भिन्नः पदार्थः परः "स्वपरव्यवसायि ज्ञानं प्रमाणम्" [१-२] इत्यत्र परशब्दस्य इत्यर्थः।

अनेन 'ज्ञानमेव तत्त्वम्,' ज्ञानातिरिक्तत्वेन प्रतिभासमाना घटपटादयो बाह्यपदार्था ज्ञानस्यैवाकारविशेषा इति वदन्तो योगाचारा-परपर्यायज्ञानाद्वैतवादिनो बौद्धा निरस्ताः। तथाहि-यदि बाह्यपदार्थौ नास्तिकौ तर्हि अयं घटः, अयं पटः, इति घटपटाद्याकारविशिष्टं ज्ञानं किं निमित्तमुत्पद्येत? अनादिवासनावैचित्र्यात् तत्तज्ज्ञानमुत्पद्यते इति चेत्, ननु सा वासना ज्ञानादभिन्ना भिन्ना वाऽभ्युपेयते, यद्यभिन्ना तर्हि ज्ञानमेव सर्वं स्यात्, न तु वासना नाम किञ्चित्, तथा च कथं वासनावशाद् ज्ञाने घटाद्याकारविशिष्टिः? भिन्ना चेत्तु ज्ञानाद्वैतहानिः स्यात्,

भूयसामपि शुक्त्यंशानां न प्रतीतिः, स्वल्पानामपि रजतांशानां प्रतीतिर्भवति, अतः 'शुक्तौ इदं रजतम्' इति ज्ञानं यथार्थमेव, तत्र ज्ञानविषयस्य विद्यमानत्वात्, विषयव्यवहारबाधात् तु भ्रमत्वेन व्यवहार इति विशिष्टाद्वैतवेदान्तिनः।

अन्यथाख्यातिः—अन्यथा स्थितस्य वस्तुनोऽन्यरूपेण प्रतीतिः, तथाहि—अन्यथा स्थितस्य शुक्त्यादिरूपस्यार्थस्यान्यथा-रजतादिरूपेण प्रतिभासनमन्यथा-(विपरीत-)ख्यातिरिति जैनाः नैयायिकाश्च।

एतासां खण्डनमण्डनप्रकारस्तु जिज्ञासुभिः स्याद्वादरत्नाकरादवसेयः, ग्रन्थविस्तरभिया नात्र प्रपञ्च्यते ॥ ११ ॥

साधकबाधकप्रमाणाभावादनवस्थितानेककोटिसंस्पर्शि ज्ञानं संशयः ॥ १२ ॥

साधकप्रमाणाभावात् बाधकप्रमाणाभावाच्चानिश्चितानेकांशावगाहि ज्ञानं संशय इत्यर्थः ॥ १२ ॥

यथाऽयं स्थाणुर्वा पुरुषो वा ॥ १३ ॥

प्रत्यक्षविषये धर्मिणि दूरादूर्ध्वतादिसाधारणधर्मदर्शनेन वक्रकोटरादिकरचरणादिविशेषधर्मस्मरणे सति एकतरनिश्चायकसाधकबाधकप्रमाणाभावाद् दोलायमानं 'स्थाणुर्वा पुरुषो वा ?' इत्याकारकं यज्ज्ञानं प्रादुर्भवति स संशयः, अयं प्रत्यक्षविषयः। अनुमानविषयस्तु क्वचिद् वनप्रदेशे शृङ्गमात्रावलोकनेन भवति संशयः, 'अयं गौर्वा स्याद् गवयो वा ?' इति ॥ १३ ॥

किमित्यालोचनमात्रमनध्यवसायः ॥ १४ ॥

यत्र विशेषस्य स्पष्टतया भानं न भवति, अपि तु किमित्या-लोचनात्मकं ज्ञानं भवति सोऽनध्यवसाय इत्युच्यते ॥ १४ ॥

यथा गच्छत्तृणस्पर्शज्ञानम् ॥ १५ ॥

यथा गच्छतः पुरुषस्यान्यत्राऽऽसक्तचित्तस्य तृणस्पर्शे जाते एवं जातीयकं एवं नामकमित्यादि विशेषरूपेणावधारणं न भवति, अपि तु 'मया किमपि स्पृष्टम्' इत्याकारकमालोचनात्मकं यज्ज्ञानं भवति सोऽनध्यवसाय इत्युच्यते । प्रत्यक्षविषयज्ञानमनध्यवसायः । परोक्ष-विषयस्तु दूरादपरिज्ञातगोजातीयस्य पुंसः गच्छतः वननिकुञ्जे सास्नामात्रावलोकनेन पिण्डमात्रमनुमाय 'को नु खल्वत्र प्राणी स्यात्?' इत्यादि ॥ १५ ॥

ज्ञानादन्योऽर्थः परः ॥ १६ ॥

ज्ञानाद् भिन्नः पदार्थः परः "स्वपरव्यवसायि ज्ञानं प्रमाणम्" [१-२] इत्यत्र परशब्दस्यायमर्थः ।

अनेन 'ज्ञानमेव तत्त्वम्,' ज्ञानातिरिक्तत्वेन प्रतिभासमाना घटपटादयो बाह्यपदार्था ज्ञानस्यैवाकारविशेषा इति वदन्तो योगाचार-पदवाच्यज्ञानाद्वैतवादिनो बौद्धा निरस्ताः । तथाहि-यदि बाह्यपदार्थो नाङ्गीक्रियते नहि अयं घटः, अयं पटः, इति घटपटाद्याकारविशिष्टं ज्ञानं किं निमित्तमुत्पद्येत ? अनादिवासनावैचित्र्यात् तादृशज्ञानमुत्पद्यते इति चेत्, ननु सा वासना ज्ञानादभिन्ना भिन्ना वाऽङ्गीक्रियते, यद्यभिन्ना तर्हि ज्ञानमेव तत्त्वं स्यात्, न तु वासना नाम किञ्चित्, तथा च कथं वासनावशात् इत्थं घटाद्याकारप्रतीतिः ? भिन्ना चेत्तु ज्ञानातिरिक्तसिद्धिः स्यात्,

ज्ञानातिरिक्तत्वेन वासनाया अप्यर्थत्वात्, तस्मान्न बाह्यार्थमन्तरा घटाद्याकारविशिष्टं ज्ञानमुपपद्यते इति बाह्यार्थोऽङ्गीकर्तव्य एवेति संक्षेपः। एते च बौद्धा वैभाषिक-सौत्रान्तिक-योगाचार-माध्यमिकभेदाच्चतुर्विधाः।

तत्र **वैभाषिको** बाह्यं घटपटादि, आन्तरं ज्ञानादि च वस्तुतत्त्वं सत्यत्वेनाङ्गीकरोति। **सौत्रान्तिको** यद्यपि बाह्यमान्तरं चेति द्विविधमपि तत्त्वं स्वीकरोति, तथापि बाह्यपदार्थानां प्रत्यक्षं नैव मन्यते, घटपटादिनानाकारं ज्ञानं वर्तते, ततोऽनुमीयते बाह्यपदार्थाः सन्तीति अनुमानेन बाह्यपदार्थावगतिं ब्रूते। **योगाचारस्तु** बाह्यपदार्थानां सर्वथैवाऽपलापं करोति, केवलमान्तरमेव ज्ञानाख्यं तत्त्वं स्वीकरोति, ज्ञानमेव ग्राह्यग्राहकरूपेण प्रतिभासते, न वस्तुतो बाह्यपदार्थाः सन्तीति सिद्धान्तयति। **माध्यमिकस्तु** सर्वशून्यत्वमेव वदति, तथाहि—मानाधीना मेयसिद्धिरिति नियमेन पदार्थानां सिद्धिर्यदि प्रमाणाधीना, तर्हि प्रमाणस्य सिद्धिः केन? अन्येन प्रमाणेन चेत्, तस्यापि कथम्? अन्येन चेत्, तर्हि तस्याप्यन्येन, इत्यादिरूपेणानवस्था, यदि तेनैव प्रमाणेन तर्हि आत्माश्रयः, अतः प्रमाणं न सिध्यति, प्रमाणसिद्ध्यभावात् प्रमेयमपि न सिध्यतीति सिद्धा सर्वशून्यता।

तथा च संग्रहश्लोकः **श्रीहरिभद्रसूरीयषड्दर्शनसमुच्चयस्य श्रीगुणरत्नसूरिकृतायां टीकायाम्**—

"अर्थो ज्ञानसमन्वितो मतिमता **वैभाषिकेणो**च्यते
प्रत्यक्षो नहि बाह्यवस्तुविसरः **सौत्रान्तिकै**राश्रितः।
योगाचारमतानुगैरभिमता साकारबुद्धिः परा
मन्यन्ते बत **मध्यमाः** कृतधियः स्वस्थां परां संविदम् ॥"

एषां खण्डनप्रकारस्तु ग्रन्थान्तरादवसेयः ॥ १६ ॥

स्वस्य व्यवसायः स्वाभिमुख्येन प्रकाशनं, बाह्यस्येव तदाभिमुख्येन, करिकलभकमहमात्मना जानामि ॥१७॥

यथा ज्ञानस्य बाह्याभिमुख्येन—विषयानुभवनेन, प्रकाशनं बाह्यव्यवसायः, एवं स्वाभिमुख्येन प्रकाशनं—स्वव्यवसायः, तथाहि—यथा 'करिकलभकमहमात्मना जानामि' इत्यत्र 'अहम्' इत्यनेन प्रमाता, 'करिकलभकम्' इत्यनेन प्रमेयं, 'जानामि' इत्यनेन प्रमितिः प्रतीयते, तथैव 'आत्मना' इत्यनेन प्रमाणभूतं ज्ञानमपि प्रतीयत एव ॥ १७ ॥

कः खलु ज्ञानस्याऽऽलम्बनं बाह्यं प्रतिभातमभिमन्यमानः तदपि तत्प्रकारं नाभिमन्येत मिहिराऽऽलोकवत् ? ॥१८॥

अयमर्थः—यथा भास्करप्रभाभिर्घटपटादिकं वस्तुजातं पश्यन्तो जना भास्करप्रभामपि पश्यन्त्येव, तथैव ज्ञानविषयीभूतानां कुम्भादीनां प्रकाशमभिमन्यमानैर्ज्ञानस्यापि प्रकाशोऽङ्गीकर्तव्य एव । एतेन 'ज्ञानमतीन्द्रियं ज्ञानजन्यज्ञातता प्रत्यक्षा तया ज्ञानमनुमीयते' इति वदन्तो मीमांसकैकदेशिनो भाट्टाः, 'समुत्पन्नं हि ज्ञानं एकात्मसमवेतानन्तरसमुत्पद्यमानमानसप्रत्यक्षेण लक्ष्यते, न तु स्वेन' इति मन्वन्तो नैयायिकाश्च निरस्ता वेदितव्याः ॥ १८ ॥

ज्ञानस्य प्रमेयाऽव्यभिचारित्वं प्रामाण्यम् ॥१९॥

ज्ञानस्य यत् प्रमेयाऽव्यभिचारित्वं—प्रमेयाऽविनाभावित्वं तदेव

अयं भावः—यादृशोऽर्थः प्रत्यक्षादिज्ञानेनाऽवगतः तादृश एव चेत् प्राप्यते तदा तज्ज्ञानं प्रमाणं, यथा सत्यरजतज्ञानम् ॥ १९ ॥

तदितरत् त्वप्रामाण्यम् ॥ २० ॥

तस्मात्—प्रमेयाऽव्यभिचारित्वात्, इतरत्—प्रमेयव्यभिचारित्वम् अप्रामाण्यम् । यादृशोऽर्थो ज्ञानविषयतामागतस्तादृश एव चेन्न प्राप्यते तदा तज्ज्ञानमप्रमाणं, यथा—'शुक्तिकायामिदं रजतम्' इति ज्ञानम् ॥२०॥

तदुभयमुत्पत्तौ परत एव ज्ञप्तौ तु स्वतः परतश्च ॥२१॥

ज्ञानगतप्रामाण्यविषये मिथो विवदन्ते दर्शनकाराः, तथाहि—उत्पत्तौ ज्ञप्तौ च ज्ञानानां प्रामाण्यं स्वतः, अप्रामाण्यं परत इति **मीमांसका वेदान्तिनश्च** । उभयत्रापि प्रमाण्याप्रामाण्यं परत इति **नैयायिकाः** । अप्रमाण्यं स्वतः प्रामाण्यं परत इति **सौगताः** । तत्त्वविदस्तु 'तदुभयमुत्पत्तौ परत एव ज्ञप्तौ तु स्वतः परतश्च' इति वदन्ति ।

तदुभयम्—प्रामाण्यमप्रामाण्यं च उत्पत्तौ—स्वोत्पत्तौ परत एव—ज्ञानकारणगतगुणदोषाभ्यामेव उत्पद्यते इति शेषः, ज्ञप्तौ तु निश्चये तु स्वतः परतश्च, अभ्यासदशाऽऽपन्ने करतलादिज्ञाने स्वतः, अनभ्यासदशाऽऽपन्ने सर्पादिज्ञाने परतः, संवाद-बाधकाभ्यां निश्चीयते ।

अयं भावः—ज्ञानसाधनम्—इन्द्रियादि यदि नैर्मल्यादिगुणविशिष्टं तर्हि तत् प्रमाणभूतं ज्ञानं जनयति, यदि तदेव काचकामलादिदोषविशिष्टं तर्हि अप्रमाणभूतं ज्ञानमुत्पादयति, तत्र ज्ञानोत्पत्तिं प्रतीन्द्रियाणां कारणत्वं, ज्ञानगतप्रामाण्याप्रामाण्योत्पादकत्वे तु गुणदोषयोः कारणत्वमिति विवेकः, ज्ञानगतप्रामाण्यस्य निश्चयस्तु अभ्यासदशाऽऽपन्ने

करतलादिज्ञाने स्वत एव भवति, अनभ्यासदशाऽऽपन्ने—सत्यसर्पादिज्ञाने संवादकज्ञानाद् भवति ।

अप्रामाण्यस्य निश्चयस्तु अभ्यासदशाऽऽपन्ने मृगतृष्णिकादौ स्वत एव भवति, अनभ्यासदशापन्ने 'शुक्ताविदं रजतम्' इति ज्ञाने तु बाधकज्ञानाद् भवतीति ।

यादृशोऽर्थः पूर्वज्ञाने प्रथमप्रवर्तितः तादृश एव येन ज्ञानेन व्यवस्थाप्यते, तत् संवादकमित्युच्यते। अन्यज्ञानमीजन्यं संवाद्यं, उदय-सामर्थ्यसमुत्थापं संवादकमिति ॥ २१ ॥

इति बालबोधिन्याख्यया टिप्पण्या विभूषिते श्रीवादिदेवसूरिसंदृब्धे प्रमाणनयतत्त्वा-लोके प्रमाणस्वरूपनिर्णायकः प्रथमः परिच्छेदः ।

एतद् द्वितयम्—इन्द्रियनिबन्धनमनिन्द्रियनिबन्धनं च, एकशः-प्रत्येकम् अवग्रह-ईहा-अवाय-धारणाभेदात् चतुर्विकल्पकम्—चतुर्भेदम् ॥ ६ ॥

विषयविषयिसन्निपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्यमवान्तरसामान्याकारविशिष्टवस्तुग्रहणमवग्रहः ॥ ७ ॥

विषयः— सामान्यविशेषात्मकोऽर्थः, विषयी—चक्षुरादीन्द्रियानिन्द्रियसमुदायः, तयोः सन्निपातः—योग्यदेशावस्थानम्, तदनन्तरमुत्पन्नं यत्सत्तामात्रविषयकं दर्शनम्—निराकारं ज्ञानम्, तस्मादनन्तरमुत्पन्नं यत् सत्त्वसामान्यादवान्तरमनुष्यत्वादिसामान्याऽऽकारविशिष्टवस्तुग्रहणम् अवग्रहः—अवग्रहशब्दवाच्य इत्यर्थः ॥ ७ ॥

अवगृहीतार्थविशेषाकाङ्क्षणमीहा ॥ ८ ॥

अवगृहीतार्थस्य—मनुष्यत्वादिसामान्यरूपेण गृहीतस्यार्थस्य विशेषाकाङ्क्षणम्—'अनेन कान्यकुब्जेन भवितव्यम्' इत्येवं—रूपमीहापदवाच्यम् ॥ ८ ॥

ईहितविशेषनिर्णयोऽवायः ॥ ९ ॥

ईहितविशेषस्य—ईहाविषयीकृतस्य वस्तुनो निर्णयः 'अयं कान्यकुब्ज एव' इत्याकारको निश्चयः—अवायः ॥ ९ ॥

स एव दृढतमावस्थापन्नो धारणा ॥ १० ॥

स एव—अवाय एव, दृढतमावस्थापन्नः—सादरस्य प्रमातुः किञ्चित्कालं तिष्ठन् धारणेत्यभिधीयते ।

इदमत्र सूत्रचतुष्टयस्य तात्पर्यम्—इन्द्रियविषयसन्निपातानन्तरं प्रथमम् 'अस्ति किञ्चिद्' इत्याकारं निराकारं ज्ञानमुत्पद्यते, तद् दर्शनमित्यभि-धीयते. तादृशदर्शनानन्तरं मनुष्यत्वावान्तरसामान्याकारविशिष्टम्—'अयं मनुष्यः' इत्याकारकं यज्ज्ञानमुत्पद्यते सोऽवग्रह इत्युच्यते, तद-नन्तरम् 'अनेन कान्यकुब्जेन भवितव्यम्' इत्याद्याकारं विशेषाऽऽकाङ्-क्षात्मकमीहाज्ञानं भवति. ततः 'अयं कान्यकुब्ज एव' इत्याकारकं निश्चयात्मकं ज्ञानमुत्पद्यते सोऽवायः, स एवावायः सादरस्य प्रमातुः किञ्चित् कालं तिष्ठन् धारणेत्यभिधीयते ॥ १० ॥

संशयपूर्वकत्वादीहायाः संशयाद् भेदः ॥ ११ ॥

ईहायाः—'अनेन कान्यकुब्जेन भवितव्यम्' इत्याकारकस्य ज्ञानस्य, संशयपूर्वकत्वात्—'किमयं कान्यकुब्जः, उत पाञ्चालः ?' इत्याकारक-संशयपूर्वकत्वात्, संशयाद् भेदः—ईहा संशयाद् भिन्नेत्यर्थः। संशयस्या-ऽप्रमाणत्वादवग्रहादिषु पाठो न कृतः ॥ ११ ॥

कथञ्चिदभेदेऽपि परिणामविशेषादेषां व्यप-देशभेदः ॥ १२ ॥

एषां—दर्शनावग्रहादीनां, कथञ्चित्—द्रव्यनयापेक्षया, अभेदेऽपि—एकत्वेऽपि, परिणामविशेषात्—पर्यायनयापेक्षया, व्यपदेशभेदः—भिन्नेन प्रतिपादनमित्यर्थः।

एतत्कथनेन दर्शनादीनां कथञ्चिदभिन्नत्वेन विद्यमान-स्वीकारेऽपि पर्यायापेक्षया कथञ्चिद् भिन्नत्वेन प्रतिपादनमिति भावः ॥ १२ ॥

असामस्त्येनाप्युत्पद्यमानत्वेन, असंकीर्णस्वभावतयाऽनुभूयमानत्वाद्, अपूर्वापूर्ववस्तुपर्यायप्रकाशकत्वात्, क्रमभावित्वात् चैते व्यतिरिच्यन्ते ॥१३॥

एते- दर्शनावग्रहादयो व्यतिरिच्यन्ते-परस्परं पृथक्त्वेन वर्तन्ते। कस्माद् ? असंकीर्णस्वभावतयाऽनुभूयमानत्वात्-भिन्नभिन्नस्वरूपेण ज्ञायमानत्वात् । सामस्त्येनोत्पत्तिस्थले नैषामसंकीर्णस्वभावतयाऽनुभूयमानताऽस्ति, अत उक्तम्-'असामस्त्येनाप्युत्पद्यमानत्वात्' इति कदाचिद् दर्शनमेव, कदाचिद् दर्शनावग्रहौ, कदाचिद् दर्शनावग्रहसंशयेहा इत्यादिरूपेणासंपूर्णतयाऽप्युत्पद्यमानत्वात् । असामस्त्येनाप्युत्पद्यमानत्वमसंकीर्णस्वभावतयानुभूयमानत्वे हेतुः, असंकीर्णस्वभावतयाऽनुभूयमानत्वं च दर्शनावग्रहादीनां परस्परभिन्नत्वे हेतुः, अयमेको हेतुः, अपूर्वापूर्ववस्तुप्रकाशकत्वात्-वस्तुनो भिन्नभिन्नधर्मस्य प्रकाशकत्वात्, अयं द्वितीयो हेतुः । क्रमभावित्वाच्च-क्रमेणोत्पद्यमानत्वाच्च, अयं तृतीयो हेतुः । तथा च येऽसंकीर्णस्वभावतयाऽनुभूयन्ते, अपूर्वापूर्ववस्तुपर्यायप्रकाशकाः, क्रमभाविनो वा ते परस्परं व्यतिरिक्ताः यथा स्तम्भादयः, अनुमानादयः, अङ्कुरकन्दलकाण्डादयो वा, तथा चैते दर्शनावग्रहादयः, तस्मात् परस्परं भिन्ना इति ॥ १३ ॥

क्रमोऽप्यमीषामयमेव तथैव संवेदनाद्, एवं क्रमाविर्भूतनिजकर्मक्षयोपशमजन्यत्वाच्च ॥१४॥

अमीषां-दर्शनावग्रहादीनां, क्रमोऽप्ययमेव-आदौ दर्शनं, तदनन्तरमवग्रहः, ततः संशयः, पश्चादीहा, ततोऽवायः, ततो धारणा,

इत्याकारक एव, तथैव संवेदनात्—अनुभूयमानत्वात्, एवंक्रमेणाविर्भूतो यो निजकर्मणो दर्शन-ज्ञानाऽऽवरणस्वरूपस्य क्षयोपशमः, तत्कार्यत्वादयमेव क्रमः, येन क्रमेण दर्शनाद्यावरणकर्मणः क्षयोपशमो भवति तेनैव क्रमेण दर्शनादय उत्पद्यन्ते इति भावः ॥ १४ ॥

अन्यथा प्रमेयानवगतिप्रसङ्गः ॥ १५ ॥

अन्यथा—यथोक्तक्रमानङ्गीकारे, प्रमेयानवगतिप्रसङ्गः—वस्तुनोऽनवगमप्रसङ्गः स्यात् ॥ १५ ॥

न खल्वदृष्टमवगृह्यते, न चानवगृहीतं संदिह्यते, न चासंदिग्धमीह्यते, न चानीहितमवेयते, नाप्यनवेतं धार्यते ॥ १६ ॥

अदृष्टे वस्तुनि अवग्रहो न भवति, अवगृहीते संदेहो न भवति, असंदिग्धे ईहा न भवति, अनीहिते अवायो न भवति, अवायाऽविनिश्चिते वस्तुनि धारणा न भवति ॥ १६ ॥

क्वचित् क्रमस्यानुपलक्षणमेषाम् आशूत्पादाद् उत्पलपत्रशतव्यतिभेदक्रमवत् ॥ १७ ॥

भावार्थः—यथा सूच्यादिना स्निग्धानेकोत्पलदलशतस्य भेदः क्रमेणैव जायते, तथा क्वचित् क्रमभाविनो दर्शनादीनामपि क्रमो नानुभूयते ॥ १७ ॥

पारमार्थिकं पुनरुत्पत्तावात्ममात्रापेक्षम् ॥ १८ ॥

---

१. [illegible]

आत्मन एवापेक्षम्—जीवद्रव्यमेवापेक्षते । अयं भावः—सांव्यवहारिकप्रत्यक्षमिन्द्रियादिसापेक्षमात्मद्रव्यमवलम्ब्योत्पद्यते, पारमार्थिकं तु प्रत्यक्षमिन्द्रियादिनिरपेक्षमात्मद्रव्यमवलम्ब्योत्पद्यते, इति ॥ १८ ॥

तद् विकलं सकलं च ॥ १९ ॥

तत्—पारमार्थिकं तु प्रत्यक्षम्, विकलम्—असमग्रविषयकम्, सकलम्—समग्रविषयकमिति द्विभेदमित्यर्थः ॥ १९ ॥

तत्र विकलमवधि-मनःपर्यायज्ञानरूपतया द्वेधा ॥ २० ॥

तत्र- विकल-सकलयोर्मध्ये, विकलं—विकलाख्यं प्रत्यक्षम्, अवधि-मनःपर्यायभेदेन द्विविधमित्यर्थः ॥ २० ॥

अवधिज्ञानावरणविलयविशेषसमुद्भवं भवगुणप्रत्ययं रूपिद्रव्यगोचरमवधिज्ञानम् ॥ २१ ॥

अवधिज्ञानस्य यदावरणं तस्य विलयविशेषात्—क्षयोपशमनामकाद् विनाशाद्, उत्पन्नं भवगुणप्रत्ययं—भवः—सुर-नारकजन्मलक्षणः, गुणः—क्षयोपशमसम्यग्दर्शनादिः, तौ प्रत्ययौ कारणे यस्य तद् भवगुणप्रत्ययं—भवकारणकं, गुणकारणकं चेति। तत्र सुर-नारकाणामवधि
जन्मग्रहणमात्रेणैवोत्पद्यत इति भवप्रत्ययमित्युच्यते; नर-
ग्दर्शनादिगुणैस्तत्प्रादुर्भवतीति गुणप्रत्ययमित्यभि
गोचरम्—पृथिव्यप्-तेजो-वाय्वन्धक
तद्विषयकम् ॥२१॥

संयमविशुद्धिनिबन्धनाद्
मनोद्रव्यपर्यायालम्बनं

संयमस्य–चारित्रस्य, विशुद्धिः–निर्मलता, निबन्धनं–कारणं यस्य स संयमविशुद्धिनिबन्धनो यो विशिष्टावरणविच्छेदः–मनःपर्यायज्ञानावरणक्षयोपशम इति यावत्। तस्माज्जातं–उत्पन्नं, मनोद्रव्यपर्यायालम्बनम्–मनोद्रव्यपर्यायविषयकं मनःपर्यायज्ञानम्। चारित्रविशुद्ध्या मनःपर्यायज्ञानावरणस्य क्षयोपशमो भवति, तेन च मनोद्रव्यपर्यायविषयकं ज्ञानमुत्पद्यते, तन्मनःपर्यायज्ञानमुच्यते ॥ २२ ॥

सकलं तु सामग्रीविशेषतः समुद्भूतसमस्तावरणक्षयापेक्षं निखिलद्रव्यपर्यायसाक्षात्कारिस्वरूपं केवलज्ञानम् ॥ २३ ॥

सकलं तु–सम्पूर्णं पारमार्थिकं प्रत्यक्षं पुनः, सामग्रीविशेषसमुद्भूतसमस्तावरणक्षयापेक्षम्–सामग्री द्विविधा, बहिरङ्गा अन्तरङ्गा च, तत्रान्तरङ्गा सामग्री प्रकृष्टप्रशस्तध्यानसम्यग्दर्शनादिस्वरूपा, बहिरङ्गा [illegible], तेन सामग्रीविशेषेण समुद्भूतः–सञ्जातो यः समस्तावरणक्षयः तदपेक्षं–तत्कारणकं निखिलद्रव्यपर्यायसाक्षात्कारिस्वरूपं केवलज्ञानमुच्यते ॥ २३ ॥

तद्वानर्हन् निर्दोषत्वात् ॥ २४ ॥

तद्वान्–केवलज्ञानवान्। कश्च सः? अर्हन् [illegible] निर्दोषत्वात्, [illegible], निर्दोषत्वात्, [illegible] ॥ २४ ॥

निर्दोषोऽसौ प्रमाणाविरोधिवाक्त्वात् ॥ २५ ॥

[illegible]

अर्हन् निर्दोषः, प्रमाणविरोधिवाक्त्वात्, यो न निर्दोषः, स न प्रमाणाऽविरोधिवाक्, प्रमाणाऽविरोधिवाक् चार्हन्, तस्मान्निर्दोष इति ॥२५॥

तदिष्टस्य प्रमाणेनाबाध्यमानत्वात् तद्वाचस्तेनाविरोधसिद्धिः ॥ २६ ॥

अर्हतः प्रमाणाविरोधिवाक्त्वप्रसाधकानुमानान्तरमाहुः—तदिष्टस्येति—अर्हन् प्रमाणाविरोधिवाक्, तदिष्टस्य—अनेकान्ततत्त्वस्य प्रमाणेनाऽबाध्यमानत्वाद् भिषग्वत्। अनेन सूत्रचतुष्टयेन सर्वज्ञाऽपलापको **मीमांसकः** प्रतिक्षिप्तो वेदितव्यः ॥ २६ ॥

न च कवलाहारवत्त्वेन तस्यासर्वज्ञत्वम्, कवलाऽऽहारसर्वज्ञत्वयोरविरोधात् ॥ २७ ॥

दिगम्बराः "केवली कवलाऽऽहारवान् न भवति, छद्मस्थेभ्यो विजातीयत्वात्" इत्यनुमानेन कवलाऽऽहारसर्वज्ञत्वयोर्विरोधमुद्भावयन्ति, तान् निराकर्तुमाहुः—न चेति तस्य—अर्हतः कवलाऽऽहारवत्त्वेनाऽसर्वज्ञत्वं न भवति, कवलाहारसर्वज्ञत्वयोर्विरोधाभावात्। अयं भावः—यदि कवलाहारस्य केवलज्ञानेन सह विरोधो भवेत् तर्ह्यस्मदीयज्ञानेनापि तस्य विरोधोऽपरिहरणीयः स्याद्, ज्ञानत्वाविशेषात्, न हि भास्करप्रभाभिर्निरस्यमानमन्धकारनिकुरम्बं दीपप्रभाभिर्न निरस्यते, तथा च नाऽस्माकमप्याहारापेक्षा भवेत्, न चैवम्, तस्मान्न सर्वज्ञत्व-कवलाहारयोर्विरोध इति दिक् ॥ २७ ॥

इति बालबोधिन्याख्यया टिप्पण्या विभूषिते
श्रीवादिदेवसूरिसंदृब्धे प्रमाणनयतत्त्वा-
लोके प्रत्यक्षस्वरूपनिर्णायको
द्वितीयः परिच्छेदः।

तृतीयः परिच्छेदः ।

अस्पष्टं परोक्षम् ॥ १ ॥

वैशद्याभावविशिष्टं यत् प्रमाणं तत् परोक्षप्रमाणमित्यर्थः ॥ १ ॥

**स्मरण-प्रत्यभिज्ञान-तर्कानुमानागमभेदतस्तत्
पञ्चप्रकारम् ॥ २ ॥**

तत्–परोक्षप्रमाणम्, अन्यत् स्पष्टम् ॥ २ ॥

**तत्र संस्कारप्रबोधसम्भूतमनुभूतार्थविषयं तदित्याकारं
वेदनं स्मरणम् ॥ ३ ॥**

अनुभवजन्यो यः संस्कारः–आत्मशक्तिविशेषस्तस्य प्रबोधात् सम्भूतम्–उत्पन्नम्, इति कारणनिरूपणम्, प्रत्यक्षादिप्रमाणैरनुभूतोऽर्थः–विषयो यस्य तदनुभूतार्थविषयम्, इति विषयप्रदर्शनम्, तदित्याकारं–तदित्युल्लेखनीयम्, इति स्वरूपप्रतिपादनम्, वेदनं–ज्ञानं स्मरणमित्युच्यते ।

स्मरणे उद्बुद्धसंस्कारः कारणम् । अनुभूतार्थस्तस्य विषयः । तदाकारेणोल्लेखनञ्च स्वरूपमिति ॥ ३ ॥

तत् तीर्थकरबिम्बमिति यथा ॥ ४ ॥

कस्मिंश्चित् यत् प्राक् कस्मिंश्चित् स्थाने प्रत्यभिज्ञातं जिनबिम्बमनु-भूतं पूर्वं यत् तत् तीर्थंकरस्य बिम्बं–प्रतिकृतिः तस्य स्मरणम् ॥ ४ ॥

अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वतासामान्यादिगोचरं संकलनात्मकं ज्ञानं प्रत्यभिज्ञानम् ॥ ५ ॥

अनुभवस्मृतिहेतुकं—प्रत्यक्षादिप्रमाणजन्यं ज्ञानमनुभवः, स्मृतिश्चानन्तरोक्ता, ते हेतुर्यस्य तद् इति कारणनिरूपणम्, गवादिषु सदृशपरिणामस्वरूपं गोत्वादिकं तिर्यक्सामान्यमित्युच्यते । कटककुण्डलादिपर्यायेषु यदन्वयिद्रव्यं सुवर्णादि तदूर्ध्वतासामान्यमित्युच्यते। एतदुभयमादिर्यस्य विसदृशपरिणामादेः, तिर्यगूर्ध्वतासामान्यादिगोचरो—विषयो यस्य तत् तिर्यगूर्ध्वतासामान्यादिगोचरम्, इति विषयनिरूपणम्, संकलनात्मकं—पदार्थस्य विवक्षितधर्मयुक्तत्वेन प्रत्यवमर्शनमात्मा स्वभावो यस्य तद् इति स्वरूपकथनम्, एतादृशं यज्ज्ञानं तत् प्रत्यभिज्ञानमुच्यते ।

प्रत्यभिज्ञानं प्रति अनुभवः स्मृतिश्च कारणम् । वस्तुनो विवक्षितधर्मयुक्तत्वेन प्रत्यवमर्शनं तस्य स्वरूपमिति भावः ॥ ५ ॥

यथा तज्जातीय एवायं गोपिण्डः, गोसदृशो गवयः, स एवायं जिनदत्त इत्यादि ॥ ६ ॥

'तज्जातीय एवायं गोपिण्डः' इति तिर्यक्सामान्योदाहरणं, 'गोसदृशो गवयः' इति पुनरपि तिर्यक्-सामान्यस्योदाहरणप्रदर्शनं नैयायिकाद्यभिमतस्योपमानप्रमाणस्य निरासार्थं, सिद्धान्ते उपमानप्रमाणस्य प्रत्यभिज्ञानेऽन्तर्भावात् । तथाहि—कश्चित् पुमान् वनेचरसकाशाद् यदा 'गोसदृशो गवयः' इति वाक्यं शुश्राव, तदैव तस्य मनसि सामान्यरूपेण प्रतिभासमाने गवयपिण्डे गवयशब्दस्य सम्बन्धज्ञान-

मभूत्, पश्चाद् वनं गतस्यास्य गवयदर्शने जाते प्राक्तनसामान्याकारसम्बन्धस्मरणे च 'स एष गवयपदवाच्यः' इति संकलनाज्ञानरूपं प्रत्यभिज्ञानं प्रादुर्भवति, एवं 'गोसदृशो गवयः' इत्यादावपि तथात्वात् प्रत्यभिज्ञानमेव। 'स एवायं जिनदत्तः' इत्यूर्ध्वतासामान्यस्योदाहरणम्, आदिशब्दात् 'स एव वह्निरनुमीयते मया' 'स एवार्थोऽनेनाप्युच्यते' इत्यादिस्मरणप्रत्यभिज्ञानुमानादिजन्यं ज्ञानं प्रत्यभिज्ञानं ज्ञातव्यम् ॥ ६ ॥

उपलम्भानुपलम्भसंभवं त्रिकालीकलितसाध्यसाधनसम्बन्धाद्यालम्बनम् 'इदमस्मिन् सत्येव भवति' इत्याद्याकारं संवेदनम्, ऊहापरनामा तर्कः ॥ ७ ॥

प्रमाणमात्रेण ग्रहणमुपलम्भः, प्रमाणमात्रेणाग्रहणमनुपलम्भः, ताभ्याम्—उपलम्भानुपलम्भाभ्यां, संभवः—उत्पत्तिर्यस्य तत् तथा, इति क्रियाविशेषणम्। त्रिकालकलितसाध्यसाधनयोः सम्बन्धः—व्याप्तिः, स आदिर्यस्य त्रिलोकीकालकलितस्य [illegible] स आलम्बनं विषयो यस्य तत् तथा, इति विशेषणमिदम्। 'इदमस्मिन् सत्येव भवति इदमस्मिन्नसति न भवत्येव' इत्याद्याकारं संवेदनं तर्कः, स एव ऊहेति कथ्यताम्।

[illegible]

यथा यावान् कश्चिद् धूमः स सर्वो वह्नौ सत्येव भवतीति तस्मिन्नसत्यसौ न भवत्येव ॥८॥

इदं च तर्कापरपर्यायं व्याप्तिज्ञानं तदोपपत्त्यन्यथानुपपत्तिभ्यां प्रवर्तत इति प्रदर्शयन्ति, यथेत्यादिना—अत्राऽऽद्यमुदाहरणमन्वयव्याप्तौ, द्वितीयं तु व्यतिरेकव्याप्ताविति ज्ञेयम् ॥ ८ ॥

अनुमानं द्विप्रकारम्, स्वार्थं परार्थं च ॥ ९ ॥

स्वार्थानुमान-परार्थानुमानभेदादनुमानं द्विविधमित्यर्थः ॥ ९ ॥

तत्र हेतुग्रहणसम्बन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थम् ॥ १० ॥

हेतुग्रहण-सम्बन्धस्मरणाभ्यां जायमानं यत् साध्यस्य ज्ञानं तत् स्वार्थानुमानमित्यर्थः ।

अयं भावः—वनं गतः कश्चित् पुमान् प्रथमं पर्वतवृत्तिधूमलेखां पश्यति, ततः 'यत्र यत्र धूमस्तत्र तत्र वह्निः' इत्याकारिकां व्याप्तिं स्मरति, ततः 'अयं वह्निमान्' इत्याकारकं यज्ज्ञानमुन्मज्जति तत् स्वार्थानुमानमित्युच्यते ॥ १० ॥

निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः ॥ ११ ॥

अन्यथानुपपत्तिः—अविनाभावः, सा च साध्यवद् भिन्नावृत्तित्वरूपा, हेत्वधिकरणवृत्त्यभावाऽप्रतियोगिसाध्यसामानाधिकरण्यरूपा वा । निश्चिताऽन्यथानुपपत्तिरेव लक्षणं स्वरूपं यस्य स हेतुरित्यर्थः ॥ ११ ॥

न तु त्रिलक्षणकादिः ॥ १२ ॥

त्रीणि लक्षणानि—पक्षसत्त्व-सपक्षसत्त्व-विपक्षाऽसत्त्वानि यस्य स त्रिलक्षणकः सौगताभिमतः, आदिशब्देनासत्प्रतिपक्षत्वाबाधितविषयत्वमिति द्वयं मिलित्वा नैयायिकाभिमतः पञ्चलक्षणश्च हेतुर्न भवतीति भावः ॥ १२ ॥

तस्य हेत्वाभासस्यापि सम्भवात् ॥ १३ ॥

तस्य पक्षसत्त्वादिरूपस्य हेतुलक्षणस्य 'पर्वतो धूमवान् वह्नेः' इति हेत्वाभासस्यापि संभवादतिव्याप्तिः स्यात् । अयं भावः—'पर्वतो धूमवान् वह्नेः' इत्यादिकमिथ्यानुमानेऽपि हेतोस्त्रैरूप्यादिकं वर्तते, तथाहि—पक्षे पर्वते हेतुभूतस्य वह्नेर्विद्यमानत्वात् पक्षसत्त्वम्, सपक्षे—महानसेऽपि विद्यमानत्वात् सपक्षसत्त्वम्, विपक्षात्—जलह्रदात् व्यावर्तमानत्वात् विपक्षाऽसत्त्वम्, प्रतिपक्षानुमानाभावात् असत्प्रतिपक्षत्वम्, प्रत्यक्षादिप्रमाणैर्बाधाराहित्यादबाधितत्वं च वर्तते, न चास्य सद्धेतुत्वम्, तस्मात् त्रिलक्षणकस्यापि हेतुलक्षणत्वेन सौगतादिभिरङ्गीकरणमयुक्तमिति ॥ १३ ॥

अप्रतीतमनिराकृतमभीप्सितं साध्यम् ॥ १४ ॥

अप्रतीतम्—असिद्धम्, अनिराकृतम्—प्रत्यक्षादिप्रमाणैरबाधितम्, अभीप्सितम्—साध्यत्वेनेष्टम्, साध्यं भवतीति शेषः ॥ १४ ॥

सन्दिग्धविपर्यस्ताव्युत्पन्नानां साध्यत्वप्रति-
पत्त्यर्थमप्रतीतवचनम् ॥ १५ ॥

पूर्वसूत्रे 'अप्रतीतम्' इति वचनस्य...

विपरीतानामनध्यवसित(अनिश्चित)वस्तूनां साध्यत्वं न स्याद्, इत्य-प्रतीतवचनम् ॥ १५ ॥

प्रत्यक्षादिविरुद्धस्य साध्यत्वं मा प्रसज्यतामित्य-निराकृतग्रहणम् ॥ १६ ॥

प्रत्यक्षविरुद्धं यथा—'वह्निरनुष्णः।' अनुमानविरुद्धं यथा-'शब्दस्य एकान्तनित्यत्वम्'। आगमविरुद्धं यथा—'प्रेत्याऽसुखप्रदत्वं धर्मस्य'। एतादृशानां प्रत्यक्षादिबाधितानां साध्यत्वं मा प्रसज्यतामित्येतदर्थम-निराकृतग्रहणम् ॥ १६ ॥

अनभिमतस्याऽसाध्यत्वप्रतिपत्तयेऽभीप्सितपदो-पादानम् ॥ १७ ॥

अनभिमतस्य — साधयितुमनिष्टस्य (यथा जैनानां, शब्दे एकान्तनित्यत्वं सर्वथाऽनभिमतं) साध्यत्वं मा भवतु इत्यभीप्सितो-पादानम् ॥ १७ ॥

व्याप्तिग्रहणसमयापेक्षया साध्यं धर्म एव, अन्यथा तदनुपपत्तेः ॥ १८ ॥

यद्यपि व्यवहारकाले 'पर्वतो वह्निमान्' इत्याकारको धर्मविशिष्टो धर्मी साध्यशब्देन व्यपदिश्यते, तथापि व्याप्तिग्रहणवेलायां साध्य-शब्देन केवलं वह्निरूपो धर्म एव गृह्यते, अन्यथा व्याप्तेरनुपपत्तिः स्यादिति ॥ १८ ॥

नहि यत्र यत्र धूमस्तत्र तत्र चित्रभानोरिव धरित्री-धरस्याप्यनुवृत्तिरस्ति ॥ १९ ॥

यत्र यत्र धूमस्तत्र तत्र यथा वह्निरनुवर्तते न तथा पर्वतोऽपि ॥ १९ ॥

आनुमानिकप्रतिपत्त्यवसरापेक्षया तु पक्षापरपर्यायस्तद्विशिष्टः प्रसिद्धो धर्मी ॥ २० ॥

आनुमानिकी प्रतिपत्तिः—अनुमितिः, तदपेक्षया 'पर्वतो वह्निमान्' इत्याकारको धर्मविशिष्टो धर्मी साध्यपदेन व्यवह्रियते, अस्यैव पक्ष इति नामान्तरम् ॥ २० ॥

धर्मिणः प्रसिद्धिः क्वचिद् विकल्पतः, कुत्रचित् प्रमाणतः, क्वापि विकल्प-प्रमाणाभ्याम् ॥२१॥

धर्मिणः—पर्वतादेः ॥ २१ ॥

यथा समस्ति समस्तवस्तुवेदी, क्षितिधरकन्धरेयं धूमध्वजवती, ध्वनिः परिणतिमान् ॥ २२ ॥

'समस्तवस्तुवेदी समस्ति' इत्यत्र समस्तवस्तुवेदी सर्वज्ञो धर्मी, तस्य च विकल्पेन प्रसिद्धिः, नहि हेतुप्रयोगात् पूर्वं विकल्पं विहाय सर्वज्ञः केनापि प्रमाणेन सिध्यति । 'क्षितिधरकन्धरेयं धूमध्वजवती' इत्यत्र धर्मिभूतायाः क्षितिधरकन्धरायाः प्रत्यक्षेणैव प्रसिद्धिः । 'ध्वनिः परिणतिमान्' इत्यत्र धर्मिणो—ध्वनेः प्रमाणेन विकल्पेन च प्रसिद्धिः, श्रूयमाणस्य शब्दस्य प्रत्यक्षप्रमाणेन, अतीतानागतयोस्तु विकल्पेन प्रसिद्धिरिति विवेकः ॥ २२ ॥

पक्षहेतुवचनात्मकं परार्थमनुमानम्, उपचारात् ॥ २३ ॥

' पर्वतो वह्निमान् धूमात् ' इत्याकारकं पक्षहेतुवचनात्मकं परार्थमनुमानम्, उपचारात्–पक्षहेतुवचनस्य जडत्वेन मुख्यतः प्रामाण्यासम्भवात् तत्रानुमानशब्दप्रयोगः, कारणे कार्योपचारादौपचारिकः, बोधव्यगतं ज्ञानं कार्यं, तस्य च कारणं पक्षहेतुवचनम् । अथवा कार्ये कारणोपचारात्, वक्तृगतं स्वार्थानुमानं कारणं तस्य पक्षहेतुवचनं कार्यमिति ॥ २३ ॥

साध्यस्य प्रतिनियतधर्मिसम्बन्धिताप्रसिद्धये हेतोरुपसंहारवचनवत् पक्षप्रयोगोऽप्यवश्यमाश्रयितव्यः ॥ २४ ॥

अयं भावः—बौद्धाः खलु प्रक्षप्रयोगं नाङ्गीकुर्वन्ति, ते हि कदाचित् "यो यो धूमवान् स स वह्निमान् यथा महानसं, धूमवांश्चायम्" इत्याकारकं व्याप्तिपुरस्सरं पक्षधर्मतोपसंहारं,कदाचित् "धूमवानयं, यो यो धूमवान् स स वह्निमान् यथा महानसम्" इत्याकारकं पक्षधर्मताप्रदर्शनपूर्वकं व्याप्त्युपसंहारमेवानुमानं वदन्ति, तान् पक्षप्रयोगमङ्गीकारयितुमाहुः–साध्यस्येत्यादि–यथा हेतोः प्रतिनियतधर्मिसम्बन्धिताप्रसिद्ध्यर्थं "धूमवांश्चायम्" इत्याकारकं हेतोरूपसंहारवचनं स्वीक्रियते, तथैव साध्यस्य प्रतिनियतधर्मिसम्बन्धिताप्रसिद्ध्यर्थं ' पर्वतो वह्निमान् ' इत्याकारकः पक्षप्रयोगोऽप्यङ्गीकर्तव्य इति ॥ २४॥

[1]त्रिविधं साधनमभिधायैव तत्समर्थनं विदधानः कः खलु न पक्षप्रयोगमङ्गीकुरुते ? ॥ २५ ॥

---

१. यथा त्रिविधं क. ।

:अवयवद्वयस्वीकारश्च व्युत्पन्नमतिप्रतिपाद्यापेक्षया द्रष्टव्यः, अतिव्युत्पन्न-मतिप्रतिपाद्यापेक्षया तु 'धूमोऽत्र विद्यते' इति हेतुप्रयोगमात्रात्मक-मेवानुमानं भवति, "मन्दमतींस्तु व्युत्पादयितुं दृष्टान्तोपनय-निगमनान्यपि प्रयोज्यानि" [३-४३] इति वक्ष्यन्ति ॥ २८ ॥

हेतुप्रयोगस्तथोपपत्त्यन्यथानुपपत्तिभ्यां द्विप्रकारः ॥ २९ ॥

'वह्निसत्त्वे एव धूमसत्त्वम्' इत्याकारकसाध्यसद्भावप्रकारेण हेतो-रुपपत्तिस्तथोपपत्तिः, 'वह्न्यभावे धूमाभावः' इत्याकारकसाध्याभाव-प्रकारेण हेतोरनुपपत्तिरन्यथानुपपत्तिः, ताभ्यामन्वय-व्यतिरेकस्वरूपाभ्यां तथोपपत्त्यन्यथानुपपत्तिभ्यां हेतुप्रयोगो द्विभेद इत्यर्थः ॥ २९ ॥

सत्येव साध्ये हेतोरुपपत्तिस्तथोपपत्तिः, असति साध्ये हेतोरनुपपत्तिरेवान्यथानुपपत्तिः ॥ ३० ॥

यथा कृशानुमानयं पाकप्रदेशः सत्येव कृशानुमत्त्वे, धूमवत्त्वस्योपपत्तेः, असत्यनुपपत्तेर्वा ॥ ३१ ॥

असत्यनुपपत्तेः—असति कृशानुमत्त्वे धूमवत्त्वस्यानुपपत्तेरित्यर्थः ॥ ३१ ॥

अनयोरन्यतरप्रयोगेणैव साध्यप्रतिपत्तौ द्वितीय-प्रयोगस्यैकत्रानुपयोगः ॥ ३२ ॥

अयं भावः—यत्र तथोपपत्तिप्रयोगेण साध्यसिद्धिः संजाता, तत्रान्यथानुपपत्तिप्रयोगस्य नोपयोगः, एवमन्यथाऽनुपपत्तिप्रयोगेण

१. °पत्तेरिति क ।

अपिशब्दात् पक्षहेतू, पक्षादिषु सम्भाव्यमानदोषनिराकरणरूपाः शुद्धयश्च पञ्च माला: ॥ ४२ ॥

प्रतिबन्धप्रतिपत्तेरास्पदं दृष्टान्तः ॥ ४३ ॥

प्रतिबन्धः—व्याप्तिः तस्याः प्रतिपत्तेः—स्मरणस्य, आस्पदं स्थानं महानसादिदृष्टान्त इत्युच्यते ॥ ४३ ॥

स द्वेधा साधर्म्यतो वैधर्म्यतश्च ॥ ४४ ॥

समानो धर्मो यस्यासौ सधर्मा तस्य भावः साधर्म्यम्—अन्वयः, विरुद्धो धर्मो यस्यासौ विधर्मा तस्य भावो वैधर्म्यम्—व्यतिरेकः, ताभ्यां साधर्म्य-वैधर्म्याभ्यामन्वय-व्यतिरेकाभ्यां दृष्टान्तो द्विभेदः इत्यर्थः ॥४४॥

यत्र साधनधर्मसत्तायामवश्यं साध्यधर्मसत्ता प्रकाश्यते स साधर्म्यदृष्टान्तः ॥ ४५ ॥

*यथा यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसः [°सम्] ॥ ४६ ॥

*यत्र तु साध्याभावे साधनस्यावश्यमभावः प्रदर्श्यते स वैधर्म्यदृष्टान्तः ॥ ४७ ॥

*यथाऽग्न्यभावे न भवत्येव धूमः, यथा जलाशये ॥ ४८ ॥

हेतोः साध्यधर्मिण्युपसंहरणमुपनयः ॥ ४९ ॥

---

* एतच्चिह्नाङ्कितं सूत्रत्रयमपि न मुद्रितं स्याद्वादरत्नाकरे । सं०

१. महानसे ख । २. जलाशयः ।

साधकः, अनुपलब्धिरूपो हेतुर्निषेधरूपस्य साध्यस्य साधक इति येऽभि-
मन्यन्ते तान् निराकर्तुमाहुः—उपलब्धिरिति—

अयं भावः—यथा उपलब्धिरूपस्य साध्यस्य साधिका तथा निषेधरूपस्यापि, एवमनुपलब्धिर्यथा निषेधरूपस्य साध्यस्य साधिका तथा विधिरूपस्यापि, तस्मादुपलब्धिर्विधिरूपस्यैव साध्यस्य साधिका, अनुपलब्धिर्निषेधरूपस्यैवेति नियमो न कर्तव्यः ॥ ५५ ॥

विधिः सदंशः ॥ ५६ ॥

सदसदात्मकस्य वस्तुनो यः सदंशः—भावरूपः स विधिरित्यर्थः ॥ ५६ ॥

प्रतिषेधोऽसदंशः ॥ ५७ ॥

सदसदात्मकस्य वस्तुनो योऽसदंशः—अभावरूपः स प्रतिषेध इति ॥ ५७ ॥

स चतुर्धा प्रागभावः प्रध्वंसाभाव इतरेतराभावो-ऽत्यन्ताभावश्च ॥ ५८ ॥

सः—प्रतिषेधः प्रागभावादिभेदेन चतुर्विध इत्यर्थः। वस्तुन उत्पत्तेः प्राग् अभावः प्रागभावः, प्रध्वंसरूपोऽभावः प्रध्वंसाभावः, इतरस्येतरस्मिन्नभाव इतरेतराभावः, अत्यन्तं कालत्रयेऽप्यभावोऽत्यन्ताभावः॥५८॥

यन्निवृत्तावेव कार्यस्य समुत्पत्तिः सोऽस्य प्रागभावः ॥ ५९ ॥

यस्य पदार्थस्य—निवृत्तावेव नाशे एव सति, कार्यस्य समुत्पत्तिः स पदार्थः, अस्य कार्यस्य प्रागभावः ॥ ५९ ॥

यथा मृत्पिण्डनिवृत्तावेव समुत्पद्यमानस्य घटस्य मृत्पिण्डः ॥ ६० ॥

मृत्पिण्डस्य नाशे सत्येव घटस्योत्पत्तिर्भवति अतः मृत्पिण्ड एव घटस्य प्रागभावः ॥ ६० ॥

यदुत्पत्तौ कार्यस्यावश्यं विपत्तिः सोऽस्य प्रध्वंसाभावः ॥ ६१ ॥

यस्य पदार्थस्योत्पत्तौ कार्यस्यावश्यं विपत्तिः—विनाशः स पदार्थः, तस्य कार्यस्य प्रध्वंसाभावः ॥ ६१ ॥

यथा कपालकदम्बकोत्पत्तौ नियमतो विपद्यमानस्य कलशस्य कपालकदम्बकम् ॥ ६२ ॥

घटनाशमन्तरा कपालोत्पत्तिर्न भवतीति कपालकदम्बकं घटस्य प्रध्वंसाभावः ॥ ६२ ॥

स्वरूपान्तरात् स्वरूपव्यावृत्तिरितरेतराभावः ॥ ६३ ॥

स्वरूपान्तरात्—स्तम्भादिस्वरूपान्तरात्, स्वरूपव्यावृत्तिः—घटादिस्वरूपस्य व्यावृत्तिः, इतरेतराभावः—अन्योन्याभाव इत्यर्थः ॥ ६३ ॥

यथा स्तम्भस्वभावात् कुम्भस्वभावव्यावृत्तिः ॥ ६४ ॥

यथा स्तम्भस्वभावात्—स्तम्भस्वरूपात्, कुम्भस्वभावस्य कलश-स्वरूपस्य, व्यावृत्तिरन्योन्याभावः ॥ ६४ ॥

कालत्रयापेक्षिणी हि तादात्म्यपरिणामनिवृत्ति-रत्यन्ताभावः ॥ ६५ ॥

भूत-भविष्यद्-वर्तमानरूपकालत्रयेऽपि याऽसौ तादात्म्यपरिणाम-निवृत्तिः—एकत्वपरिणामव्यावृत्तिः सोऽत्यन्ताभावः ॥ ६५ ॥

यथा चेतनाऽचेतनयोः ॥ ६६ ॥

यथा चेतनः—जीवो भूत-भविष्यद्-वर्तमानरूपकालत्रयेऽपि अचेतनत्वेन—जडत्वेन न परिणमति, एवमचेतनोऽपि न चेतनस्वरूपेण। तदेवंप्रकारेण चेतनाचेतनयोः कालत्रयेऽपि या तादात्म्यपरिणामनिवृत्तिः सोऽत्यन्ताभाव इत्यर्थः ॥ ६६ ॥

उपलब्धेरपि द्वैविध्यमविरुद्धोपलब्धिर्विरुद्धोपलब्धिश्च ॥ ६७ ॥

साध्येन सहाविरुद्धस्य हेतोरुपलब्धिरविरुद्धोपलब्धिः, साध्येन सह विरुद्धस्य हेतोरुपलब्धिर्विरुद्धोपलब्धिरित्युच्यते ॥ ६७ ॥

तत्राविरुद्धोपलब्धिर्विधिसिद्धौ षोढा ॥ ६८ ॥

विधिरूपस्य साध्यस्य सिद्धावविरुद्धोपलब्धिः षोढा—षट्प्रकारेत्यर्थः ॥ ६८ ॥

षट्प्रकारानाहुः—

साध्येनाविरुद्धानां व्याप्य-कार्य-कारण-पूर्वचरोत्तर-सहचराणामुपलब्धिः ॥ ६९ ॥

साध्येनाविरुद्धस्य व्याप्यस्य, कार्यस्य, कारणस्य, पूर्वचरस्य, उत्तरचरस्य, सहचरस्य चोपलब्धिः व्याप्याविरुद्धोपलब्धिः, कार्याविरुद्धोपलब्धिः, कारणाविरुद्धोपलब्धिः, पूर्वचराविरुद्धोपलब्धिः, उत्तर-

चराविरुद्धोपलब्धिः, सहचराविरुद्धोपलब्धिरित्यविरुद्धोपलब्धेः षड् भेदा इत्यर्थः ॥ ६९ ॥

तमस्विन्यामास्वाद्यमानादाम्रादिफलरसाद् एकसामग्र्य-नुमित्या रूपाद्यनुमितिमभिमन्यमानैरभिमतमेव किमपि कारणं हेतुतया यत्र शक्तेरप्रति-स्खलनमपरकारणसाकल्यं च ॥ ७० ॥

बौद्धाः किल वदन्ति—"विधिरूपस्य साध्यस्य सिद्धौ स्वभाव-कार्ये एव हेतुत्वेनाङ्गीकरणीये न कारणम्, तथाऽयोगोलके वह्निरूपस्य कारणस्य विद्यमानत्वेऽपि धूमरूपकार्यानुत्पादात्" तान् कारणस्यापि हेतुत्वमङ्गीकारयितुमाहुः—तमस्विन्यामित्यादि—

आम्रादिफले रूप-रसयोर्जनिका एकैव सामग्री, तथा च रजन्या-मास्वाद्यमानादाम्रादिफलरसात् तज्जनिका सामग्र्यनुमीयते, तया च सामग्र्या रूपानुमानं भवति, एवमभिमन्यमानैः सौगतैः स्वीकृतमेव कार्यानुमापकं प्रतिबन्धाभावविशिष्टं कारणान्तरसहकृतं च किमपि कारणम्, तस्मात् कारणस्यापि हेतुत्वमङ्गीकरणीयमिति भावः, एवं 'अस्त्यत्र छाया छत्रात्' इत्यादीन्यपि कारणानुमानानि ज्ञातव्यानि ॥ ७० ॥

पूर्वोत्तरचारिणोर्न स्वभावकार्य-कारणभावौ, तयोः कालव्यवहितावनुपलम्भात् ॥ ७१ ॥

पूर्वोत्तरचारिणो स्वभावहेतौ कार्यहेतौ वाऽन्तर्भावो न सम्भवति, ययोः स्वभावकार्य-कारणभावयोः कालव्यवहितौ—काल-व्यवधाने, अनुपलम्भात् ।

भूत-भविष्यद्-वर्तमानरूपकालत्रयेऽपि याऽसौ तादात्म्यपरिणाम-निवृत्तिः—एकत्वपरिणामव्यावृत्तिः सोऽत्यन्ताभावः ॥ ६५ ॥

यथा चेतनाऽचेतनयोः ॥ ६६ ॥

यथा चेतनः—जीवो भूत-भविष्यद्-वर्तमानरूपकालत्रयेऽपि अचेतनत्वेन—जडत्वेन न परिणमति, एवमचेतनोऽपि न चेतनस्वरूपेण। तदेवं-प्रकारेण चेतनाचेतनयोः कालत्रयेऽपि या तादात्म्यपरिणामनिवृत्तिः सोऽत्यन्ताभाव इत्यर्थः ॥ ६६ ॥

उपलब्धेरपि द्वैविध्यमविरुद्धोपलब्धिर्विरुद्धोप-लब्धिश्च ॥ ६७ ॥

साध्येन सहाविरुद्धस्य हेतोरुपलब्धिरविरुद्धोपलब्धिः, साध्येन सह विरुद्धस्य हेतोरुपलब्धिर्विरुद्धोपलब्धिरित्युच्यते ॥ ६७ ॥

तत्राविरुद्धोपलब्धिर्विधिसिद्धौ षोढा ॥ ६८ ॥

विधिरूपस्य साध्यस्य सिद्धावविरुद्धोपलब्धिः षोढा—षट्प्रकारेत्यर्थः ॥ ६८ ॥

षट्प्रकारानाहुः—

साध्येनाविरुद्धानां व्याप्य-कार्य-कारण-पूर्वचरोत्तर-सहचराणामुपलब्धिः ॥ ६९ ॥

साध्येनाविरुद्धस्य व्याप्यस्य, कार्यस्य, कारणस्य, पूर्वचरस्य, उत्तरचरस्य, सहचरस्य चोपलब्धिः व्याप्याविरुद्धोपलब्धिः, कार्या-[विरुद्धोप]लब्धिः, कारणाविरुद्धोपलब्धिः, पूर्वचराविरुद्धोपलब्धिः, उत्तर-

चराविरुद्धोपलब्धिः, सहचराविरुद्धोपलब्धिरित्यविरुद्धोपलब्धेः षड् भेदा इत्यर्थः ॥ ६९ ॥

तमस्विन्यामास्वाद्यमानादाम्रादिफलरसाद् एकसामग्र्य-
नुमित्या रूपाद्यनुमितिमभिमन्यमानैरभिमतमेव
किमपि कारणं हेतुतया यत्र शक्तेरप्रति-
स्खलनमपरकारणसाकल्यं च ॥ ७० ॥

बौद्धाः किल वदन्ति—"विधिरूपस्य साध्यस्य सिद्धौ स्वभाव-कार्ये एव हेतुत्वेनाङ्गीकरणीये न कारणम्, तप्ताऽयोगोलके वह्निरूपस्य कारणस्य विद्यमानत्वेऽपि धूमरूपकार्यानुत्पादात्" तान् कारणस्यापि हेतुत्वमङ्गीकारयितुमाहुः—तमस्विन्यामित्यादि—

आम्रादिफले रूपरसयोर्जनिका एकैव सामग्री, तथा च रजन्या-मास्वाद्यमानादाम्रादिफलरसात् तज्जनिका सामग्र्यनुमीयते, तया च सामग्र्या रूपानुमानं भवति, एवमभिमन्यमानैः सौगतैः स्वीकृतमेव कार्योत्पादकं प्रतिबन्धाभावविशिष्टं कारणान्तरसहकृतं च किमपि कारणम्, तस्मात् कारणस्यापि हेतुत्वमङ्गीकरणीयमिति भावः, एवं '[illegible]' इत्यादीन्यपि कारणानुमानानि ज्ञातव्यानि ॥ ७० ॥

पूर्वचरोत्तरचरयोर्न स्वभावकार्य-कारणभावौ, तयोः
कालव्यवहितावनुपलम्भात् ॥ ७१ ॥

पूर्वचरोत्तरचरयोः स्वभावहेतौ तदुत्पत्तिहेतौ चाऽन्तर्भावो न सम्भवति, यतः स्वभावकार्य-कारणभावयोः कालव्यवहितौ—काल-व्यवधाने, अनुपलम्भात्।

अयं भावः–साध्य-साधनयोस्तादात्म्ये सति स्वभावहेतावन्तर्भावो भवेत्, यथा–'अयं वृक्षः शिंशपात्वात्' इत्यस्य स्वभावेऽन्तर्भावः तथा साध्य-साधनयोः कार्य-कारणभावे सति कार्यहेतौ कारणहेतौ वाऽन्तर्भावो विभाव्येत, यथा 'पर्वतो वह्निमान् धूमात्' इत्यस्य कार्ये, 'भविष्यति वर्षं तथाविधवारिवाहविलोकनात्' इत्यस्य कारणेऽन्तर्भावः। न च पूर्वचरोत्तरचरयोः स्वभावे कार्य-कारणभावे वाऽन्तर्भावः सम्भवति, स्वभावकार्य-कारणभावयोः कालव्यवधाने उपलम्भाभावात्, पूर्वचरोत्तरचरयोस्तु कालव्यवधानेऽपि उपलम्भो भवति, तस्मान्न स्वभावे कार्ये कारणे वाऽन्तर्भावः ॥ ७१ ॥

न चातिक्रान्तानागतयोर्जाग्रद्दशासंवेदन-मरणयोः प्रबोधोत्पातौ प्रति कारणत्वं, व्यवहितत्वेन निर्व्यापारत्वात् ॥ ७२ ॥

ननु वर्तमानप्रबोधं प्रति अतीतस्य जाग्रद्दशासंवेदनस्य, एवं सांप्रतिकं ध्रुवाऽनवीक्षणादिकमरिष्टं प्रति अनागतस्य मरणस्य कारणत्वदर्शनात् कालव्यवधानेऽपि कार्य-कारणभावो भवेत्येवेति वदन्तं निराकुर्वन्नाहुः–न चेत्यादि–

जाग्रद्दशासंवेदन-प्रबोधयोर्मरणारिष्टयोश्च कार्य-कारणभावो न सम्भवति तयोरत्यन्तव्यवहितत्वेन व्यापाराभावात्, नहि निर्व्यापारमपि कारणं भवति, निर्व्यापारस्यापि कारणत्वेऽङ्गीक्रियमाणे सर्वं सर्वं प्रति कारणं भवेत् ॥ ७२ ॥

स्वव्यापारापेक्षिणी हि कार्यं प्रति पदार्थस्य कारणत्वव्यवस्था कुलालस्येव कलशं प्रति ॥ ७३ ॥

भावार्थः—यद्व्यापारमन्तरा यत् कार्यं नोत्पद्यते तत् कार्यं प्रति तस्य कारणत्वं निर्णीयते यथा कुलालव्यापारमन्तरा घटस्योत्पत्तिर्न भवतीति घटं प्रति कुलालस्य कारणत्वं भवति, न चान्यत्तन्त्रवदिति कार्यं कारणत्वव्यवहारः कल्पयितुं शक्यते, अतिप्रसङ्गात् ॥ ७३ ॥

न च कालव्यवहितयोरन्यतरव्यापारपरिकल्पनं न्याय्यम्, अतिप्रसक्तेः ॥ ७४ ॥

तयोः अतिक्रान्तानागतयोः जाग्रद्दशासंवेदन-मरणयोः ॥ ७४ ॥

परम्परान्तरहितानां परेषामपि तत्कल्पनस्य निवारयितुमशक्यत्वात् ॥ ७५ ॥

प्रबोधोत्पत्तौ प्रति व्यवहितयोर्जाग्रद्दशासंवेदन-मरणयोरपि [illegible] व्यवहितानामतीतानागतानां [illegible] प्रबोधोत्पत्तौ प्रति व्यापारपरि-कल्पनात् कारणत्वं स्यात्, तथा चानिष्टं स्यादिति भावः ॥ ७५ ॥

सहचारिणोः परस्परस्वरूपपरित्यागेन तादात्म्यानुपपत्तेः, सहोत्पादेन तदुत्पत्तिविरोधाच्च सहचरहेतोरपि प्रोक्तेषु नान्तर्भावः ॥ ७६ ॥

[illegible] सहचारिणोः [illegible] अपि तु [illegible] [illegible] [illegible] [illegible] [illegible]

कारणे वाऽन्तर्भावः, तस्मात् सहचरहेतोरपि प्रोक्तेषु स्वभावादिषु नान्तर्भाव इति ॥ ७६ ॥

ध्वनिः परिणतिमान्, प्रयत्नानन्तरीयकत्वात्, यः प्रयत्नाऽनन्तरीयकः स परिणतिमान्, यथा स्तम्भः, यो वा न परिणतिमान् स न प्रयत्नानन्तरीयकः, यथा वान्ध्येयः, प्रयत्नानन्तरीयकश्च ध्वनिः, तस्मात् परिणतिमानिति व्याप्यस्य साध्येनाविरुद्धस्योपलब्धिः साधर्म्येण वैधर्म्येण च ॥ ७७ ॥

अत्र परिणतिमत्त्वेन साध्येनाविरुद्धस्य प्रयत्नाऽनन्तरीयकत्वस्य व्याप्यस्योपलब्धिर्वर्तते इति व्याप्याविरुद्धोपलब्धिः । यद्यपि धूमादिस्वरूपकार्यादिहेतूनामपि साध्यव्याप्यत्वं वर्तते तथापि तादृशव्याप्यत्वं नेह विवक्षितं अपि तु कथञ्चित्साध्येन सह तादात्म्येन स्थितस्य प्रयत्नानन्तरीयकत्वादेः स्वरूपमेव व्याप्यत्वेन विवक्षितं अत एवेयं स्वभावोपलब्धिरित्यप्युच्यते ॥ ७७ ॥

अस्त्यत्र गिरिनिकुञ्जे धनञ्जयः, धूमसमुपलम्भात्, इति कार्यस्य ॥ ७८ ॥

अत्र साध्येन वह्निनाऽविरुद्धस्य कार्यस्य धूमस्योपलब्धिर्वर्तते इति कार्याविरुद्धोपलब्धिः ॥ ७८ ॥

---

१. यश्च न क । २. धूमोपलम्भादिति ख ।

भविष्यति वर्षं, तथाविधवारिवाहविलोकनात्, इति कारणस्य ॥ ७९ ॥

अत्र साध्येन वर्षेणाऽविरुद्धस्य तथाविधवारिवाहस्य कारणस्योपलब्धिः कारणाविरुद्धोपलब्धिः । एवं 'अस्त्यत्र छाया छत्रात्' इत्यप्युदाहरणं द्रष्टव्यम् ॥ ७९ ॥

उदेष्यति मुहूर्तान्ते तिष्यतारका, पुनर्वसूदयदर्शनात्, इति पूर्वचरस्य ॥ ८० ॥

तिष्यतारका—पुष्यनक्षत्रम् । अत्र साध्येन भविष्यत्तिष्यतारकोदयेनाविरुद्धस्य पुनर्वसूदयस्य दर्शनादुपलब्धिरिति पूर्वचराविरुद्धोपलब्धिः । 'अश्विनी, भरणी, कृत्तिका, रोहिणी, मृगशीर्षम्, आर्द्रा, पुनर्वसू, पुष्यः, आश्लेषा, मघा, पूर्वाफाल्गुनी, उत्तराफाल्गुनी, हस्तः, चित्रा, स्वातिः, विशाखा, अनुराधा, ज्येष्ठा, मूलम्, पूर्वाषाढा, उत्तराषाढा, अभिजित्, श्रवणः, धनिष्ठा, शतभिषक्, पूर्वाभद्रपदा, उत्तराभद्रपदा, रेवती' इति क्रमेणाष्टाविंशतिर्नक्षत्राणि ॥ ८० ॥

उदगान्मुहूर्तात् पूर्वं पूर्वफल्गुन्यः, उत्तरफल्गुनीनामुदयोपलब्धेः, इत्युत्तरचरस्य ॥ ८१ ॥

अत्र साध्येनातीतपूर्वफल्गुन्युदयेनाविरुद्धस्य उत्तरफल्गुनीनामुदयस्योपलब्धिः, इत्युत्तरचराविरुद्धोपलब्धिः ॥ ८१ ॥

१. 'भविष्यति पुष्यतारा' [illegible] ।

२. 'पूर्वफल्गुन्य उत्तरफल्गुन्योः' [illegible] ।

अस्तीह सहकारफले रूपविशेषः, समास्वाद्यमानरस-विशेषात्, इति सहचरस्य ॥ ८२ ॥

अत्र रूपविशेषेण साध्येनाविरुद्धस्य सहचरस्य रसविशेषस्योपलब्धिरिति सहचराविरुद्धोपलब्धिः ॥ ८२ ॥

विरुद्धोपलब्धिस्तु प्रतिषेधप्रतिपत्तौ सप्तप्रकारा ॥ ८३ ॥

प्रतिषेधात्मके साध्ये विरुद्धोपलब्धिः सप्तप्रकारा इत्यर्थः ॥ ८३ ॥

तत्राऽऽद्या[1] स्वभावविरुद्धोपलब्धिः ॥ ८४ ॥

प्रतिषेध्यस्यार्थस्य यः स्वभावः—स्वरूपं तेन सह यत् साक्षाद् विरुद्धं तस्योपलब्धिः स्वभावविरुद्धोपलब्धिः ॥ ८४ ॥

यथा नास्त्येव सर्वथैकान्तः, अनेकान्तस्योपलम्भात् ॥ ८५ ॥

अत्र प्रतिषेध्यः सर्वथैकान्तः तत्स्वरूपेण साक्षाद् विरुद्धोऽनेकान्तः-तस्योपलब्धिरिति स्वभावविरुद्धोपलब्धिः ॥ ८५ ॥

प्रतिषेध्यविरुद्धव्याप्तादीनामुपलब्धयः षट् ॥ ८६ ॥

प्रतिषेध्येनार्थेन सह ये साक्षाद् विरुद्धास्तेषां ये व्याप्तादयो व्याप्य-कार्य-कारण-पूर्वचरोत्तरचर-सहचरास्तेषामुपलब्धयः षट् तथाहि—विरुद्धव्याप्तोपलब्धिः, विरुद्धकार्योपलब्धिः, विरुद्धकारणोपलब्धिः, विरुद्धपूर्वचरोपलब्धिः, विरुद्धोत्तरचरोपलब्धिः, विरुद्धसहचरोपलब्धिश्चेति ॥ ८६ ॥

---

१. आद्याद्या क ।

विरुद्धव्याप्तोपलब्धिर्यथा—नास्त्यस्य पुंसः तत्त्वेषु निश्चयः, तत्र सन्देहात् ॥ ८७ ॥

अत्र प्रतिषेध्यः तत्त्वेषु निश्चयः तेन साक्षाद् विरुद्धोऽनिश्चयः तस्य व्याप्तः सन्देहः, तस्योपलब्धिरिति विरुद्धव्याप्तोपलब्धिः ॥ ८७ ॥

विरुद्धकार्योपलब्धिर्यथा—न विद्यतेऽस्य क्रोधाद्युपशान्तिः, वदनविकारादेः ॥ ८८ ॥

अत्र प्रतिषेध्यः क्रोधाद्युपशमः तद्विरुद्धश्चानुपशमः, तत्कार्यस्य ताम्र-[illegible] वदनविकारादेरुपलब्धिरिति विरुद्धकार्योपलब्धिः ॥ ८८ ॥

विरुद्धकारणोपलब्धिर्यथा—नास्य महर्षेरसत्यं वचः समस्ति, राग-द्वेषकालुष्याकलङ्कितज्ञानसम्पन्नत्वात् ॥ ८९ ॥

अत्र प्रतिषेध्यमसत्यं तद्विरुद्धं सत्यं तस्य कारणं राग-द्वेषकालुष्याकलङ्कितं ज्ञानं तस्योपलब्धिरिति विरुद्धकारणोपलब्धिः ॥ ८९ ॥

विरुद्धपूर्वचरोपलब्धिर्यथा—नोद्गमिष्यति मुहूर्तान्ते पुष्यतारा, [1]रोहिण्युद्गमात् ॥ ९० ॥

अत्र प्रतिषेध्यो पुष्यतारोद्गमः तद्विरुद्धो मृगशीर्षोदयः तस्य पूर्वचरो रोहिण्युद्गमः तस्योपलब्धिरिति विरुद्धपूर्वचरोपलब्धिः ॥ ९० ॥

विरुद्धोत्तरचरोपलब्धिर्यथा—नोदगान्मुहूर्तात् पूर्वं मृगशिरः, [2]पूर्वफाल्गुन्युदयात् ॥ ९१ ॥

१. [illegible] क ।   २. [illegible] ख ।

३. [illegible] ख ।

विरुद्धसहचरानुपलब्धिर्यथा—अस्त्यस्य मिथ्याज्ञानं, सम्यग्दर्शनानुपलब्धेः ॥ १०९ ॥

अत्र विधेयं मिथ्याज्ञानं तद्विरुद्धं सम्यग्ज्ञानं तत्सहचरं सम्यग्दर्शनं तस्यानुपलब्धिरिति विरुद्धसहचरानुपलब्धिः ॥ १०९ ॥

इति बालबोधिन्याख्यया टिप्पण्या विभूषिते
श्रीवादिदेवसूरिसंदृब्धे प्रमाणनयतत्त्वा-
लोके प्रत्यक्षस्वरूपनिर्णायको
तृतीयः परिच्छेदः ।

चतुर्थः परिच्छेदः ।

आप्तवचनादाविर्भूतमर्थसंवेदनमागमः ॥ १ ॥

आप्तः—यथार्थवक्ता तस्य वचनादाविर्भूतमुत्पन्नं यदर्थसंवेदनं—पदार्थज्ञानं स आगमः इति निर्गलितार्थः ॥ १ ॥

उपचारादाप्तवचनं च ॥ २ ॥

ननु यदि आप्तवचनादुत्पन्नं ज्ञानमागमस्तर्हि आप्तवचनमागमो नेति चेत् ... इत्यत आह—उपचारादिति ।
अयं भावः प्रतिपाद्यगतस्य ज्ञानस्य कारणत्वादाप्तवचनमिति कारणे आप्तवचने कार्योपचाराद् आप्तवचनमपि आगमशब्दवाच्यम् ॥ २ ॥

समस्त्यत्र प्रदेशे रत्ननिधानं, सन्ति रत्नसानुप्रभृतयः ॥ ३ ॥

"समस्त्यत्र प्रदेशे रत्ननिधानम्" इत्यनेन लौकिकाप्तस्य वचनं दर्शितम्, "सन्ति रत्नसानुप्रभृतयः" इत्यनेन तु लोकोत्तराप्तवचनं निदर्शितम् ॥ ३ ॥

अभिधेयं वस्तु यथावस्थितं यो जानीते यथाज्ञानं चाभिधत्ते स आप्तः ॥ ४ ॥

तस्य हि वचनमविसंवादि भवति ॥ ५ ॥

---

१. [illegible]

विरुद्धसहचरानुपलब्धिर्यथा—अस्त्यस्य मिथ्याज्ञानं,
सम्यग्दर्शनानुपलब्धेः ॥ १०९ ॥

अत्र विधेयं मिथ्याज्ञानं तद्विरुद्धं सम्यग्ज्ञानं तत्सहचरं सम्यग्दर्शनं तस्यानुपलब्धिरिति विरुद्धसहचरानुपलब्धिः ॥ १०९ ॥

इति बालबोधिन्याख्यया टिप्पण्या विभूषिते
श्रीवादिदेवसूरिसंदब्धे प्रमाणनयतत्त्वा-
लोके प्रत्यक्षस्वरूपनिर्णायको
तृतीयः परिच्छेदः ।

चतुर्थः परिच्छेदः ।

आप्तवचनादाविर्भूतमर्थसंवेदनमागमः ॥ १ ॥

आप्तः—वक्ष्यमाणः । तस्य वचनादाविर्भूतमुत्पन्नं यदर्थसंवेदनं—पदार्थज्ञानं तदागमप्रमाणमिति निष्कर्षः ॥ १ ॥

उपचारादाप्तवचनं च ॥ २ ॥

ननु यदि आप्तवचनादुत्पन्नं ज्ञानमागमत्वेन निगद्यते तर्हि आप्तवचने कथमागमत्वव्यवहारः ? इत्यत्राहुः—उपचारादिति । सर्वं ह्यतः प्रतिपाद्यमानस्य आगमज्ञानस्य कारणत्वात् आप्तवचनमपि कारणे कार्योपचारात् आगमत्वव्यवहारः ॥ २ ॥

समस्त्यत्र प्रदेशे रत्ननिधानं, सन्ति रत्नसानुप्रभृतयः ॥ ३ ॥

“समस्त्यत्र प्रदेशे रत्ननिधानम्” इत्येतत् लौकिकाप्तवचनं निदर्शितं, “सन्ति रत्नसानुप्रभृतयः” इत्येतत् तु लोकोत्तरस्य तीर्थकरादिवचनस्य निदर्शनम् ॥ ३ ॥

अभिधेयं वस्तु यथावस्थितं यो जानीते यथाज्ञानं चाभिधत्ते स आप्तः ॥ ४ ॥

तस्य हि वचनमविसंवादि भवति ॥ ५ ॥

१. [illegible]

हि—यस्मात् तस्य आप्तस्य वचनमविसंवादि—सफलप्रवृत्तिजनकं भवति तस्मात् स आप्त इति भावः ॥ ५ ॥

स च द्वेधा लौकिको लोकोत्तरश्च ॥ ६ ॥

लौकिको जनकादिर्लोकोत्तरस्तु तीर्थकरादिः ॥ ७ ॥

अत्राऽऽहुर्मीमांसकाः—नहि पौरुषेयस्याऽऽगमस्य प्रामाण्यं भवितुमर्हति, भ्रमप्रमादादिदोषसुलभत्वात् पुरुषस्य, न च स्वर्गाद्यतीन्द्रियवस्तुदर्शित्वं कस्यापि सम्भवति येन तदंशे तद्वचनस्य प्रामाण्यं भवेत्, तस्मादपौरुषेयो वेद एवागमप्रमाणत्वेनाङ्गीकरणीयः, न च वेदेऽपौरुषेयत्वमसिद्धं, 'वेदोऽपौरुषेयः संप्रदायाऽव्यवच्छेदे सत्यस्मर्यमाणकर्तृकत्वात्' इत्यनुमानेन तत्र तस्य सिद्धत्वादिति ।

तदतितुच्छम्, द्वितीयपरिच्छेदे सर्वथा दोषासंस्पृष्टस्य सकलार्थदर्शिनः पुरुषधौरेयस्य सर्वज्ञस्य प्रसाधितत्वात्, तद्वचनप्रामाण्ये बाधकाभावात् यदुक्तं -"अपौरुषेयो वेद एव आगमप्रमाणत्वेनाङ्गीकरणीयः" इति तदपि न युक्तम्, वेदस्य वर्णात्मकत्वात्, वर्णानां पुरुषप्रयत्नजन्यत्वाद् भारतादिवत् पौरुषेयत्वमेव सिध्यति । न च पुरुषप्रयत्नमन्तरोत्पद्यमानो वर्णात्मकः शब्दः केनचित् कुत्राप्युपलब्धः ।

यत् तु "संप्रदायाऽव्यवच्छेदे सत्यस्मर्यमाणकर्तृकत्वात्" इति हेतुरपौरुषेयसाधकत्वेनोपन्यस्तः सोऽपि विशेष्यासिद्धिदोषदुष्टत्वान्न स्वसाध्यसाधनायाऽलं, वैदिकैरेव नैयायिकादिभिर्वेदस्य ईश्वरकर्तृकत्वेन स्मरणात् । विशेषणं च संदिग्धासिद्धं, तथाहि—आदिमतामपि

१. °त्तरस्तीर्थ° ख ।

मात्रादीनां संकेताद्यै [illegible] दृष्टः, अनादिस्तु वेदस्य नामापि संकेतापेक्षत्वेऽपि हानि इति कथमिव निषिध्यते भोः ! ।

“ प्रजापतिः सोमं राजानमसृजत्, तं त्रयो वेदा अन्वसृज्यन्त ” “ अग्निहोत्रं वेदा [illegible] निर्मीयते ” इत्यागमेनापि वेदस्य पौरुषेयत्वमेव प्रतीयते, इति न कथमपि वेदस्यापौरुषेयत्वं सिद्ध्य- मानानि [illegible] प्रामाण्यमिति ॥ ७ ॥

वर्णपदव्यापारात्मकं वचनम् ॥ ८ ॥

अकारादिः पौद्गलिको वर्णः ॥ ९ ॥

वृत्तिः—अकारादिवर्णसमुदायः पौद्गलिकः । [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] न [illegible], न च ‘ [illegible] [illegible] ’ इति [illegible], [illegible] [illegible] [illegible], [illegible] [illegible] ‘ [illegible] [illegible] ’ ‘ [illegible] ’ इत्यादिषु [illegible] [illegible] । एवं ‘ [illegible] न [illegible] [illegible] [illegible] [illegible] ’ [illegible] [illegible] [illegible] [illegible], [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] ।

[illegible] [illegible] ‘ [illegible] [illegible] [illegible], [illegible] ’ [illegible], न च [illegible] [illegible], [illegible] [illegible] [illegible] [illegible], न च [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible], [illegible] [illegible]-

श्रवणेन बालकादीनां कर्णोपघातो भवेत्? भवति चायं कर्णोपघातः, तस्मात् शब्दस्य स्पर्शवत्त्वं नाऽसिद्धं, सिद्धे च स्पर्शवत्त्वे शब्दस्य मूर्तिमत्त्वसिद्धिः, तेन च पौद्गलिकत्वसिद्धिरिति दिक् ॥ ९ ॥

वर्णानामन्योऽन्यापेक्षाणां निरपेक्षा संहतिः पदं, पदानां तु वाक्यम् ॥ १० ॥

वर्णानामकारादीनां, अन्योऽन्यापेक्षाणां—पदार्थप्रतिपत्तौ परस्परसहकारितया वर्तमानानाम्, निरपेक्षा-पदान्तरवर्तिवर्णनिरपेक्षा-संहतिः—संघातः पदमभिधीयते। एवमेव पदानां वाक्यार्थप्रतिपत्तौ परस्परसहकारितया स्थितानां वाक्यान्तरवर्तिपदनिरपेक्षा संहतिः वाक्यमित्युच्यते ॥ १० ॥

स्वाभाविकसामर्थ्यसमयाभ्यामर्थबोधनिबन्धनं शब्दः ॥ ११ ॥

स्वाभाविकसामर्थ्यं—शब्दस्यार्थप्रतिपादिका शक्तिः, समयः—संकेतः, ताभ्यां कृत्वा अर्थज्ञानस्य कारणं शब्द इति।

अयं भावः——यद्यपि अर्थप्रतिपादने शब्दस्य स्वाभाविकं सामर्थ्यमस्ति तथापि सहकारित्वेन संकेतमपेक्षते, अन्यथा अज्ञातसंकेतस्यापि पुंसः शब्दश्रवणमात्रेणार्थोपस्थितिः स्यात्, न चैवं दृश्यते। ननु तर्हि संकेतेनैव शब्दस्यार्थबोधकत्वमङ्गीक्रियतां किमर्थं तत्र स्वाभाविकसामर्थ्यं स्वीक्रियते? इति चेद्, उच्यते—संकेतस्य पुरुषेच्छाधीनत्वात् कदाचित् 'शब्दोऽपि वाच्यः, अर्थोऽपि वाचकः' इति विपरीतमपि स्यात्, सामर्थ्येऽङ्गीक्रियमाणे तु नैवं भवितुमर्हति, तस्मात् सामर्थ्य-संकेताभ्यां शब्दस्यार्थावबोधकत्वमङ्गीकरणीयमिति ॥ ११ ॥

अर्थप्रकाशकत्वमस्य स्वाभाविकं प्रदीपवत्, यथार्थाऽ-यथार्थत्वे पुनः पुरुषगुण-दोषावनुसरतः ॥ १२ ॥

अर्थप्रकाशकत्वं स्वाभाविकमेव, यथार्थोऽयथार्थप्रतिपादकत्वं तु पुरुषगुण-दोषावनुसरतः । यदि पुरुषः सम्यग्ज्ञानी दयालुः सत्यवक्ता च तदा तत्प्रयुक्तः शब्दः यथार्थज्ञानं जनयति, अन्यथा तु अयथार्थज्ञान-मुत्पादयति ॥ १२ ॥

सर्वत्रायं ध्वनिर्विधि-प्रतिषेधाभ्यां स्वार्थमभिदधानः सप्तभङ्गीमनुगच्छति ॥ १३ ॥

सर्वत्र ध्वनिः—शब्दः सर्वत्र विधिमुखेन निषेधमुखेन च, स्वार्थम्—निजप्रतिपाद्यमर्थं वस्तु, अभिदधानः—प्रतिपादयन्, सप्तभङ्गीम्—स्यादस्तीत्यादिसप्तभङ्गात्मकतां सप्तधा प्रयोगमनुगच्छति ॥ १३ ॥

एकत्र वस्तुन्येकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोः समस्तयोश्च विधि-निषेधयोः कल्पनया स्यात्काराङ्कितः सप्तधा वाक्प्रयोगः सप्तभङ्गी ॥ १४ ॥

एकत्र—जीवादावेकस्मिन् वस्तुनि, एकैकधर्मपर्यनुयोगवशात्—एकैकधर्मविषयकप्रश्नवशात्, अविरोधेन—प्रत्यक्षादिबाधापरिहारेण, व्यस्तयोः—पृथग्भूतयोः, समस्तयोः—समुदितयोश्च विधिनिषेधयोः, कल्पनया—पर्यालोचनया [illegible], स्यात्काराङ्कितः—[illegible], सप्तधा—सप्तप्रकारैर्वाक्यप्रयोगः सप्तभङ्गी कथ्यते ।

इदमत्र बोध्यम् —[illegible]

१. [illegible]

कमिति सिद्धान्तः। तत्रैकैकधर्ममवलम्ब्य सप्तविधप्रश्नवशात् सप्तधा वाक्यं प्रवर्तते। उद्देश्य-विधेयात्मकं हि वाक्यं भवति, एवं च कस्मिंश्चिद् वस्तुनि कमपि धर्ममवलम्ब्योद्देश्य-विधेयात्मकं सप्तधैव वचनविन्यासः प्रवर्तते, नाधिकं नाऽपि न्यूनं, तथाहि—घटे अस्तित्वधर्ममवलम्ब्य 'स्यादस्त्येव घटः' 'स्यान्नास्त्येव घटः' 'स्यादस्ति नास्ति च घटः' 'स्यादवक्तव्य एव घटः' 'स्यादस्ति चावक्तव्यश्च घटः' 'स्यान्नास्ति चावक्तव्यश्च घटः' 'स्यादस्ति नास्ति चावक्तव्यश्च घटः' इति सप्तभङ्गाः प्रवर्तन्ते।

प्रश्नानां सप्तविधत्वं च प्रश्नकर्तुः सप्तविधजिज्ञासोदयात्। जिज्ञासायाः सप्तविधत्वं सप्तविधसंशयसमुद्भवात्। सन्देहस्यापि सप्तविधत्वं संदेहविषयीभूतधर्माणां कथञ्चिदस्तित्वादीनां सप्तविधत्वात्। तथाहि—कथञ्चिदस्तित्वं, कथञ्चिन्नास्तित्वं, कथञ्चित्क्रमार्पितोभयत्वं, कथञ्चिदवक्तव्यत्वं, कथञ्चिदस्तित्वविशिष्टावक्तव्यत्वं, कथञ्चिन्नास्तित्वविशिष्टावक्तव्यत्वं, कथञ्चित्क्रमार्पितोभयविशिष्टावक्तव्यत्वमिति। एवं च वस्तुषु प्रतिपर्यायमवलम्ब्य सप्तविधसंशयविषयीभूतधर्माणां विद्यमानत्वाद् घटः स्यादस्ति न वा? इति कथञ्चित्सत्त्वसर्वथासत्त्वरूपविरुद्धकोटिद्वयात्मकः संशयः समाविर्भवति, संशयेन च घटे वास्तविकसत्त्वनिर्णयार्थं जिज्ञासोत्पद्यते, ततो घटः किं स्यादस्त्येव? इति प्रश्नः प्रवर्तते तादृशप्रश्नवशात् प्रतिपादयितुः प्रतिपिपादयिषा जायते, ततः प्रतिपादयति, तथा च प्रश्नानां सप्तधैव प्रवर्तमानत्वादुत्तरस्यापि सप्तविधत्वमेव प्रपन्नं भवति।

इयं सप्तभङ्गी प्रमाणसप्तभङ्गी-नयसप्तभङ्गीभेदेन द्विविधा। तत्र

प्रसिद्धं सत्त्वादिधर्मस्वरूपं प्रमाणगम्यम् । प्रतिपक्षं [illegible] विकल्पाऽद्वैता-त्मकाया च [illegible] । एकधर्मपर्यनुयोगेन अविरोधेन अविरोधो-पपादनाद् वा सदसत्त्वादिधर्मानवच्छिन्नविषयकबोधजनकत्वरूपं सप्तभङ्गीत्वम् । कुतः सप्तैव भङ्गाः प्रतिपाद्यन्ते ! कुत्र चाविरोधोऽनयोः ! इति चेत्, उच्यते—[illegible] सर्वधर्माणां [illegible]-त्वात् 'स्यादस्त्येव घटः' इति वाक्यमपि [illegible] प्रतिपादनद्वारा सदसत्त्वादिधर्मसंवलितं वस्तु अविरोधेन प्रतिपादयति । यथांशतोऽनव-[illegible] सर्वधर्माणां परस्परविरोधात् [illegible] प्रमाणे [illegible] वस्तु प्रतिपादयति । [illegible] एकधर्मानवच्छिन्नविषयकबोधजनकं वाक्यं [illegible] इति ॥ १४ ॥

तत्र—स्यादस्त्येव सर्वमिति विधिकल्पनया प्रथमो भङ्गः ॥ १५ ॥

अत्र [illegible]

[illegible]

लभ्यते—यत् स्वरूपादिभिरस्त्येव सर्वं वस्तु न तु नास्त्यपि, पररूपादिभिर्नास्तित्वं तु इष्टमेव ।

एवकारस्त्रिधा—अयोगव्यवच्छेदकः, अन्ययोगव्यवच्छेदकः, अत्यन्तायोगव्यवच्छेदकश्च । तत्र विशेषणसंगतैवकारोऽयोगव्यवच्छेदकः । अयोगव्यवच्छेदकत्वं नाम—उद्देश्यतावच्छेदकसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगित्वं, यथा 'शङ्खः पाण्डुर एव' इत्यत्रोद्देश्यतावच्छेदकं शङ्खत्वं, तत्समानाधिकरणात्यन्ताभावो न तावत्पाण्डुरत्वात्यन्ताभावोऽपि तु पीतत्वाद्यत्यन्ताभावः, तत्प्रतियोगित्वं पीतत्वादौ, अप्रतियोगित्वं पाण्डुरत्वे वर्तत इति लक्षणसमन्वयः । विशेष्यसंगतैवकारोऽन्ययोगव्यवच्छेदकः, अन्ययोगव्यवच्छेदकत्वं च विशेष्यभिन्नतादात्म्यादिव्यवच्छेदः, यथा—'पार्थ एव धनुर्धरः, अत्र पार्थान्यतादात्म्याभावो धनुर्धरे एवकारेण बोध्यते । क्रिया संगतैवकारश्चात्यन्तायोगव्यवच्छेदकः । अत्यन्ताऽयोगव्यवच्छेदकत्वं नाम—उद्देश्यतावच्छेदकव्यापकाभावाप्रतियोगित्वं, यथा—'नीलं सरोजं भवत्येव' इत्यत्र उद्देश्यतावच्छेदकं सरोजत्वं तद्व्यापकोऽत्यन्ताभावो नहि नीलाऽभेदाऽभावोऽपि तु पटाऽभेदाऽभावः, तत्प्रतियोगित्वं पटाऽभेदे, अप्रतियोगित्वं नीलाऽभेदे वर्तत इति लक्षणसमन्वयः ।

ननु 'स्यादस्त्येव सर्वम्' इत्यादौ एवकारस्य क्रियासंगत्वादत्यन्तायोगव्यवच्छेदेन भवितव्यं, तथा सति विवक्षिताऽर्थासिद्धिः स्यात्, कस्मिंश्चिद् घटे अस्तित्वस्याभावेऽपि 'स्यादस्त्येव घटः' इत्याकारकप्रयोगसम्भवात्, यथा कस्मिंश्चित् सरोजे नीलत्वाऽभावेऽपि 'नीलं

सदेवं भवत्येव' इत्याकारकप्रयोग इति चेत्, न, *एवकारोऽन्ययोग-
व्यवच्छेदकत्वेनैवकारस्य [illegible], क्रियासंगतैवकारोऽपि क्वचिदयोग-
व्यवच्छेदबोधको भवति, यथा—'ज्ञानार्थं गृहाणैव' इत्यत्र ज्ञानत्व-
समानाधिकरणात्यन्ताभावाप्रतियोगित्वस्य अर्थत्वात् बोधः। एवं
'स्यादस्त्येव घटः' इत्यादिष्वपि अयोगव्यवच्छेदक एव एवकारो
बोद्धव्यः।

यद्यपि शब्दतो सामर्थ्यादसत्त्वमपि घटस्य स्वरूपेणैव, तथापि
'स्यादस्त्येव घटः' इत्यत्र सत्त्वस्य प्राधान्येन भानम्, असत्त्वस्य
अप्राधान्येन। एवं द्वितीयभङ्गे नास्तित्वस्य प्राधान्येन अस्तित्वस्य
अप्राधान्येन भानम्। एवमग्रिमभङ्गेष्वपि ज्ञातव्यम् ॥ १५ ॥

स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीयः ॥ १६ ॥

'स्यात् [illegible] कथंचिन्नास्त्येव कुम्भादिः' इति निषेध-
कल्पनया द्वितीयो भङ्गः ॥ १६ ॥

स्यादस्त्येव नास्त्येवेति क्रमतो विधि-निषेधकल्पनया तृतीयः ॥ १७ ॥

यदा [illegible] क्रमेण विवक्षितो तदा 'स्या-
दस्त्येव स्यान्नास्त्येव' इति तृतीयो भङ्गः ॥ १७ ॥

स्यादवक्तव्यमेवेति युगपद्विधि-निषेधकल्पनया चतुर्थः ॥ १८ ॥

* [illegible] इति [illegible]।

यदा अस्तित्व-नास्तित्वधर्मौ युगपत्प्रधानभावेन विवक्षितौ, तदा तादृशयुगपद्धर्मद्वयबोधकशब्दाभावादवक्तव्यमेवेति चतुर्थो भङ्गः ॥१८॥

स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधि-निषेधकल्पनया च पञ्चमः ॥ १९ ॥

स्वद्रव्यादिचतुष्टयापेक्षयाऽस्तित्वे सति अस्तित्व-नास्तित्वाभ्यां यौगपद्येन वक्तुमशक्यं सर्वं वस्तु, इति स्यादस्तित्वविशिष्टस्यादवक्तव्यमेवेति पञ्चमो भङ्गः ॥ १९ ॥

स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया, युगपद्विधि-निषेधकल्पनया च षष्ठः ॥ २० ॥

परद्रव्यादिचतुष्टयापेक्षया नास्तित्वे सति अस्तित्व-नास्तित्वाभ्यां यौगपद्येन वक्तुमशक्यं सर्वं वस्तु, इति स्यान्नास्तित्वविशिष्टस्यादवक्तव्यमेवेति षष्ठो भङ्गः ॥ २० ॥

स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो विधि-निषेधकल्पनया, युगपद्विधि-निषेधकल्पनया च सप्तम इति ॥ २१ ॥

क्रमतः स्वद्रव्यादिचतुष्टयापेक्षयाऽस्तित्वे सति परद्रव्यादिचतुष्टयापेक्षया नास्तित्वे च सति यौगपद्येनास्तित्व-नास्तित्वाभ्यां वक्तुमशक्यं सर्वं वस्तु, इति सप्तमो भङ्गः ॥ २१ ॥

विधिप्रधान एव ध्वनिरिति न साधु ॥ २२ ॥

---

१. सप्तमः । 'इति' पदं नास्ति क ।

'शब्दः प्राधान्येन विधिमेवाभिधत्ते न निषेधम्' इति कथनं न युक्तमित्यर्थः ॥ २२ ॥

अत्र हेतुमाह—

निषेधस्य तस्मादप्रतिपत्तिप्रसक्तेः ॥ २३ ॥

शब्दो यदि प्राधान्येन विधिबोधक एव भवेत् तर्हि तस्मात् निषेधस्य ज्ञानं कदापि न स्यात्, निषेधज्ञानं तु अनुभवसिद्धं, तस्मान्न विधिबोधक एव शब्दः किन्तु निषेधबोधकोऽपीति भावः ॥ २३ ॥

अप्राधान्येनैव ध्वनिस्तमभिधत्त इत्यसाम्प्रतम् ॥ २४ ॥

ननु भवतु शब्दो निषेधबोधकोऽपि तथाऽपि अप्राधान्येनैव तदभिधायी इति चेत्, तदसाम्प्रतम् ॥ २४ ॥

अत्र कारणमाह—

क्वचित् कदाचित् कथञ्चित् प्राधान्येनाप्रतिपन्नस्य तस्याप्राधान्यानुपपत्तेः ॥ २५ ॥

निषेधस्य क्वचित् प्राधान्येन ज्ञानाभावेऽप्राधान्येन ज्ञानं न सम्भवतीति तस्मात् शब्दः क्वचित् प्राधान्येनापि निषेधाभिधायी इत्यङ्गीकर्तव्यम् ॥ २५ ॥

निषेधप्रधान एव शब्द इत्यपि प्रागुक्तन्यायाद-पास्तम् ॥ २६ ॥

शब्दो यदि प्राधान्येन [illegible] एव तर्हि विधिबोधो न स्यात्, [illegible] विधिं [illegible] चेत्, पूर्ववत् [illegible]

भावेन बोधकत्वमन्तराऽन्यत्राप्रधानभावेन बोधकत्वासम्भवात्, तस्माद् निषेधप्रधान एव शब्दः' इति एकान्तोऽपि न समीचीन इति भावः ॥ २६ ॥

क्रमादुभयप्रधान एवायमित्यपि न साधीयः ॥ २७ ॥

अयं शब्दः 'स्यादस्त्येव घटः स्यान्नास्त्येव घटः' इत्याकारकं क्रमार्पितोभयमेवाभिधत्ते इत्यपि न साधु ॥ २७ ॥

अस्य विधि-निषेधान्यतरप्रधानत्वानुभवस्याप्यबाध्यमानत्वात् ॥ २८ ॥

अस्य—शब्दस्य विधिप्राधान्येन निषेधप्राधान्येन च स्वातन्त्र्येणानुभूयमानत्वात् 'क्रमादुभयप्रधान एवायम्' इति तृतीयभङ्गैकान्तोऽपि न कान्तः ॥ २८ ॥

युगपद्विधि-निषेधात्मनोऽर्थस्यावाचक एवासाविति *वचो न चतुरस्रम् ॥ २९ ॥

असौ शब्दो विधिरूपमर्थं निषेधरूपमर्थं च युगपत्प्राधान्येन प्रतिपादयितुं न समर्थ इत्यर्थकः 'स्यादवक्तव्यमेव' इति चतुर्थभङ्गैकान्तोऽपि न रमणीयः ॥ २९ ॥

---

* अत्र यद्यपि स्याद्वादरत्नाकरावतारिकानुसारेणैव सूत्राणि मुद्रितानि, स्याद्वादरत्नाकरावतारिकायां च '*च न चतुरस्रम्' इति पाठो वर्तते, तथाऽपि अन्यमुद्रितपुस्तके, हस्तलिखितपुस्तके च 'वचो न चतुरस्रम्' इत्येव पाठो दृश्यते, अस्माकमप्ययमेव पाठः श्रेयान् प्रतिभाति, तस्माद् 'वचो न चतुरस्रम्' इति पाठ एव स्वीकृतोऽत्रास्माभिः। सं०—मुनिहिमांशुविजयः।

तथाऽवक्तव्यशब्देनाप्यवाच्यत्वप्रसङ्गात् ॥ ३० ॥

भावार्थः—चतुर्थभङ्गैकान्ते हि शब्दस्याऽवक्तव्यशब्देनाऽप्य-वाच्यत्वं स्यात्, तस्माच्चतुर्थभङ्गैकान्तोऽपि न युक्तः ॥ ३० ॥

विध्यात्मनोऽर्थस्य वाचकः सन्नुभयात्मनो युगपद्-
वाचक एव स इत्येकान्तोऽपि न
कान्तः ॥ ३१ ॥

'स्यादस्ति [illegible] एव शब्दः' इत्येकान्तोऽपि न युक्त इति ॥ ३१ ॥

अथ [illegible]माह—

निषेधात्मनः सह द्व्यात्मनश्चार्थस्य वाचकत्वा-
वाचकत्वाभ्यामपि शब्दस्य प्रतीयमान-
त्वात् ॥ ३२ ॥

'[illegible]' इति [illegible]ऽर्थस्य [illegible] [illegible] [illegible] ॥ ३२ ॥

निषेधात्मनोऽर्थस्य [illegible] सन्नुभयात्मनो युगपद्
[illegible]

अत्र हेतुं प्रदर्शयन्ति—

इतरथाऽपि संवेदनात् ॥ ३४ ॥

प्रथमभङ्गादिषु विध्यादिप्राधान्येनापि शब्दस्य प्रतीयमान-
षष्ठभङ्गैकान्तोऽपि न समीचीन इति भावः ॥ ३४ ॥

क्रमाक्रमाभ्यामुभयस्वभावस्य भावस्य वाचकश्चा-
वाचकश्च ध्वनिर्नान्यथेत्यपि मिथ्या ॥३५॥

'क्रमार्पितोभयत्वविशिष्टावक्तव्यस्वभावस्य वस्तुन एव वाचकः शब्दः'
इत्यपि मिथ्या ॥ ३५ ॥

अत्र बीजमाख्यान्ति—

विधिमात्रादिप्रधानतयापि तस्य प्रसिद्धेः ॥ ३६ ॥

'स्यादस्त्येव घटः' 'स्यान्नास्त्येव घटः' इति विध्यादिप्राधान्ये-
नापि शब्दस्य प्रतीयमानत्वात् सप्तमभङ्गैकान्तोऽपि न युक्त इत्यर्थः ॥३६॥

एकत्र वस्तुनि विधीयमान-निषिध्यमानानन्तधर्माभ्यु-
पगमेनानन्तभङ्गीप्रसंगादसंगतैव सप्तभङ्गीति[1]
न चेतसि निधेयम् ॥ ३७ ॥

एकस्मिन् जीवादौ वस्तुनि अनन्तानां विधीयमान-निषिध्यमान-
धर्माणां स्वीकृतत्वादनन्ता एव तत्प्रतिपादकवचनमार्गाः स्युः कथं सप्तैव
भङ्गाः ? इति मनसि न करणीयम् ॥ ३७ ॥

---

1. °ति चेतसि न नि° ख ।

तस्य—सन्देहस्याऽपि सप्तविधत्वं सन्देहविषयीभूतवस्तुधर्माणां कथञ्चिदस्तित्वादीनां सप्तविधत्वादित्यर्थः ॥ ४२ ॥

इयं सप्तभङ्गी प्रतिभङ्गं [1]सकलादेशस्वभावा विकलादेशस्वभावा च ॥ ४३ ॥

प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद् वा यौगपद्येन प्रतिपादकं वचः सकलादेशः ॥ ४४ ॥

यौगपद्येनानन्तधर्मात्मकं वस्तु प्रतिपादयति सकलादेशः ।

[illegible] 'तस्मात् परिणामी शब्दः' [illegible], तथापि कदाचित् "तस्मात् कृतकः शब्दः" इति [illegible], "तस्मात् परिणामी कुम्भः" इति [illegible] ॥ ८२ ॥

[illegible] ॥ ८३ ॥

[illegible] ॥ ८३ ॥

[illegible]

[illegible] सन्ति [illegible]

[illegible] ॥८४॥

[illegible] ॥ ८४ ॥

* [illegible]

प्रमाणस्य स्वरूपाऽऽभासमुक्त्वा संप्रति तस्य संख्याऽऽभासमाख्यान्ति—

प्रत्यक्षमेवैकं प्रमाणमित्यादिसंख्यानं तस्य संख्याऽऽभासम् ॥ ८५ ॥

प्रत्यक्ष-परोक्षभेदेन प्रमाणस्य द्वैविध्यमुक्तं, तद्वैपरीत्येन 'प्रत्यक्षमेकमेव प्रमाणम्' इति **चार्वाकाः**। 'प्रत्यक्षानुमाने एव' इति **सौगताः**, **वैशेषिकाश्च**। प्रत्यक्षानुमानाऽऽगमा एव प्रमाणम्' इति **सांख्यादयो** यद् वदन्ति तत् प्रमाणस्य संख्याऽऽभासम्। प्रमाणसंख्याऽभ्युपगमश्च तत्तद्वादिनामित्थम्—

"चार्वाकोऽध्यक्षमेकं, सुगत-कणभुजौ सानुमानं, सशाब्दं
तद्द्वैतं पारमर्षः, सहितमुपमया तद् त्रयं चाक्षपादः।
अर्थाऽऽपत्त्या प्रभाकृद् वदति च निखिलं मन्यते भट्ट एतत्
साभावं, द्वे प्रमाणे जिनपतिसमये स्पष्टतोऽस्पष्टतश्च" ॥ ८५ ॥

विषयाभासं प्रकाशयन्ति—

सामान्यमेव, विशेष एव, तद्द्वयं वा स्वतन्त्रमित्यादिस्तस्य विषयाभासः ॥ ८६ ॥

---

१. प्रत्यक्षम्। २. बौद्ध-वैशेषिकौ। ३. प्रत्यक्षानुमानद्वयम्। ४. साङ्ख्यः। ५. नैयायिकः। "नैयायिकस्त्वाक्षपादो योगः" [३-५२६] इति **हैमः**। ६. कुमारिलः। ७ जैनसिद्धान्ते, 'समयः शपथे भाषा-सम्पदोः काल-संविदोः। सिद्धान्ताऽऽचार-संकेत-नियमावसरेषु च ॥ [तृतीयकाण्डे] इति **हैमानेकार्थकः**। प्रत्यक्षतः परोक्षतश्चेत्यर्थः। प्रत्यक्ष-परोक्षातिरिक्तप्रमाणखण्डनं तु **स्याद्वादरत्नाकरतो** (परि० २-१) **रत्नाकरावतारिकातश्च** विज्ञेयम्।—संशोधकः **मुनिहिमांशुविजयः**।

प्रमाणस्य विषयः सामान्य-विशेषाऽऽत्मकं वस्तु इति पूर्वमुक्तं, [प० ॥ ५-१ ॥ पृ० ७८] तद्वैपरीत्येन 'सामान्यमेव प्रमाणस्य विषयः' इति सर्वोऽद्वैतवादिनः, 'विशेष एव' इति सौगताः । 'तदुभयं च स्वतन्त्रम्' इति । नैयायिका यत् स्वीकुर्वन्ति स विषयाऽऽभास इत्यर्थः ॥ ८६ ॥

अभिन्नमेव भिन्नमेव वा प्रमाणात् फलं, तस्य
तदाभासम् ॥ ८७ ॥

अभिन्नमेव प्रमाणात् फलं बौद्धानाम् । भिन्नमेव नैयायिकादीनाम् । तत्र प्रमाणस्य फलाऽऽभासमिति । वस्तुतः प्रमाणात् फलस्य भिन्नाभिन्नत्वं प्रागुपदर्शितम् ॥ ८७ ॥

इति बालबोधिन्याख्यया टिप्पण्या विभूषिते
श्रीवादिदेवसूरिसंदृब्धे प्रमाणनयतत्त्वा-
लोके प्रमाणफलस्वरूपनिर्णायको
षष्ठः परिच्छेदः ।

सप्तमः परिच्छेदः ।

नीयते येन श्रुताख्यप्रमाणविषयीकृतस्यार्थस्यांश-स्तदितरांशौदासीन्यतः, स प्रतिपत्तुरभिप्राय-विशेषो नयः ॥ १ ॥

श्रुताख्यप्रमाणविषयीकृतस्य शाब्दबोधे प्रतिभासमानस्यार्थस्य, एकदेशः-अनन्तांशात्मके वस्तुनि एकोंऽशः तदितरांशौदासीन्यतो येन अभिप्रायविशेषेण नीयते—ज्ञायते स प्रतिपत्तुरभिप्रायविशेषो नयः ॥१॥

स्वाभिप्रेतादंशादितरांशापलापी पुनर्नयाभासः ॥ २ ॥

योऽभिप्रायविशेषः स्वाभिप्रेतमंशमङ्गीकृत्य, इतरांशानपलपति स नयाभासः ॥ २ ॥

स व्यास-समासाभ्यां द्विप्रकारः ॥ ३ ॥

स नयो व्यास-समासाभ्यां विस्तर-संक्षेपाभ्यां द्विप्रकारः—द्विभेदः ॥ ३ ॥

व्यासतोऽनेकविकल्पः ॥ ४ ॥

---

१. पद्यानुशासनविधातारो विख्यातख्यातयः **श्रीहेमचन्द्राचार्यपादा** नयाऽऽभासादीनां (दुर्नयादीनां) लक्षणान्येवमाख्यातवन्तः—

"सदेव, सत्, स्यात् सद्, इति त्रिधार्थो
मीयेत दुर्नीति-नय-प्रमाणैः ।"

—अन्ययोगव्यव० कारिका २८ ॥

२. जावइआ वयणपहा तावइआ चेव हुंति नयवाया ॥ (यावन्तो वचनपथास्तावन्तश्चैव भवन्ति नयवादाः) **इत्यार्षम्** । वादिमल्लप्रतिमल्लैः **श्रीमल्लवादिसूरिभिः श्रीनयचक्रवाल**ग्रन्थे नयाः शतशः प्रकाराः प्ररूपिता अतस्ततो विशेषपरिचयः प्राप्यः । स च ग्रन्थो मुद्र्यमाण—(मुद्रितः) आस्ते । —संशोधकः मुनिहिमांशुविजयः ।



सत्त्वविशिष्टं चैतन्यं—'सच्चैतन्यमात्मनि वर्तते' इति वाक्ये चैतन्याख्य-धर्मस्य प्राधान्येन विवक्षा, तस्य विशेष्यत्वात्, सत्त्वाख्यधर्मस्य तु गौणत्वेन, तस्य चैतन्यविशेषणत्वादिति धर्मद्वयविषयको नैगमस्य प्रथमो भेदः ॥ ८ ॥

वस्तु पर्यायवद् द्रव्यमिति धर्मिणोः ॥ ९ ॥

अत्र 'पर्यायवद् द्रव्यं वस्तु च' इति धर्मिद्वयम्। 'पर्यायवद् द्रव्यं वस्तु वर्तते' इति विवक्षायां पर्यायवद् द्रव्याख्यस्य धर्मिणो विशेष्यत्वे-नोपात्तत्वात् प्राधान्यम्, वस्त्वाख्यस्य तु धर्मिणो विशेषणत्वेन गौणत्वम्। अथवा किं वस्तु? 'पर्यायवद् द्रव्यमिति विवक्षायां वस्त्वाख्यस्य धर्मिणो विशेष्यत्वात् प्राधान्यं, पर्यायवद् द्रव्याख्यस्य तु धर्मिणो विशेषणत्वेन गौणत्वमिति धर्मिद्वयविषयको नैगमस्य द्वितीयो भेदः ॥ ९ ॥

क्षणमेकं सुखी विषयासक्तजीव इति धर्म-धर्मिणोः ॥ १० ॥

अत्र विषयाऽऽसक्तजीवस्य प्राधान्यं, विशेष्यत्वेनोपात्तत्वात्, सुख-रूपस्य धर्मस्य तु अप्राधान्यं, विशेषणत्वेन निर्दिष्टत्वाद् इति धर्म-धर्मि-द्वयाऽऽलम्बनोऽयं नैगमस्य तृतीयो भेदः ॥ १० ॥

धर्मद्वयादीनामैकान्तिकपार्थक्याभिसन्धिर्नैगमाऽऽभासः ॥ ११ ॥

आदिपदेन धर्मिद्वय-धर्मधर्मिद्वययोः संग्रहः। तथा च द्वयोर्धर्मयोः,

---

१. इति तु धर्म° क ख।

२. °सन्धिरैकान्तिकभेदाभिप्रायो नै° क।

धर्मयोर्धर्मिणोः, धर्म-धर्मिणोर्वा विषये ऐकान्तिकभेदाभिप्रायो यः स नैगमाभास इत्यर्थः ॥ ११ ॥

यथा—आत्मनि सत्त्व-चैतन्ये परस्परमत्यन्तं पृथग्भूते इत्यादिः ॥ १२ ॥

एवं 'पर्यायवद् द्रव्यं वस्तु' च 'क्षणमेकं सुखी विषयासक्तजीवः' इत्यादौ धर्मिणोर्धर्मधर्मिणोर्वा भेद इत्यादावपि ऐकान्तिकभेदाभिप्रायविशेषः स नैगमाभास इत्यर्थः ॥ १२ ॥

सामान्यमात्रग्राही परामर्शः संग्रहः ॥ १३ ॥

सामान्यमात्रग्राही—सत्त्वद्रव्यत्वादिसामान्यमात्रविषयकः परामर्शः अभिप्रायविशेषः संग्रहः । सकलैर्भेदैरेकीभावेन विशिष्टतया विशेषान् गृह्णाति संगृह्णाति इति व्युत्पत्तेः ॥ १३ ॥

अयमुभयविकल्पः परोऽपरश्च ॥ १४ ॥

अयं संग्रहनयो द्वयः परापरभेदेन द्विविध इत्यर्थः ॥ १४ ॥

अशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परसंग्रहः ॥ १५ ॥

न्यम् । तत्र शुद्धद्रव्यं सन्मात्रमभिमन्यमानः समस्तविशेषेषु औदासीन्यं भजमानो योऽभिप्रायविशेषः स परसंग्रहाऽऽख्यो नयो बोद्धव्यः ॥१५॥

विश्वमेकं सदविशेषादिति यथा ॥ १६ ॥

विश्वं—जगत्, एकम्—एकरसं, सदविशेषात्—'सत्' इत्याकारकज्ञानाभिधानाभ्यामविशेषरूपेण ज्ञायमानत्वात्, अनेनानुमानेन सकलविशेषेष्वौदासीन्यमवलम्बमानः सत्ताद्वैतं स्वीकुर्वाणोऽभिप्रायविशेषः परसंग्रहः ॥ १६ ॥

सत्ताद्वैतं स्वीकुर्वाणः सकलविशेषान् निराचक्षाणस्तदाभासः ॥ १७ ॥

यथा—सत्तैव तत्त्वं, ततः पृथग्भूतानां विशेषाणामदर्शनात् ॥ १८ ॥

अद्वैतवादिनो हि सत्ताऽतिरिक्तं वस्त्वन्तरं नाङ्गीकुर्वन्ति, अतोऽद्वैतदर्शनं संग्रहाभासत्वेन ज्ञातव्यम् ॥ १८ ॥

द्रव्यत्वादीन्यवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलम्बमानः पुनरपरसंग्रहः ॥ १९ ॥

---

१. जैनसिद्धान्ते द्रव्य-पर्याययोरात्यन्तिको भेदो निषिद्धः, तथा चोक्तवन्तः **सन्मतितर्के** प्रचण्डतार्किकचक्रचक्रवर्तिनः तत्रभवन्तः **श्रीसिद्धसेनदिवाकरपादाः**—

"दव्वं पज्जवविउअं दव्वविउत्ता य पज्जवा णत्थि" ॥
(द्रव्यं पर्यववियुतं द्रव्यवियुक्ताश्च पर्यवा न सन्ति" ॥१-१२॥)

—संशोधकः मुनिहिमांशुविजयः ।

२. सदविशेषात् क । ३. परः संग्रहः ख ।

इत्यादीनि [illegible] पर्यायप्रवृत्तीनां तानि द्रव्यत्वादीनि अवान्तर-
सामान्यानि – [illegible] अवान्तर-
सामान्यानि [illegible] तद्भेदेषु धर्माधर्माऽऽकाश-काल-पुद्गल-जीवादि-
विशेषेषु [illegible] गजनिमीलिकाम्-उपेक्षामवलम्बमानः पुन-
[illegible] ॥ १९ ॥

र्धर्माधर्माऽऽकाश-काल-पुद्गल-जीवद्रव्याणामैक्यं,
द्रव्यत्वाभेदादित्यादिर्यथा ॥ २० ॥

धर्माधर्मादीनामैक्यं द्रव्यत्वाभेदात्—'द्रव्यं द्रव्यम्' इत्यभिन्न-
[illegible] इत्यर्थः। आदिपदेन चेतना-
[illegible], पर्यायाभेदादिति पर्यायाणामैक्यम् [illegible]
[illegible] ॥ २० ॥

द्रव्यत्वादिकं प्रतिजानानस्तद्विशेषान् निह्नुवान-
स्तदाभासः ॥ २१ ॥

[illegible] स्पष्टार्थः ॥ २१ ॥

यथा द्रव्यत्वमेव तत्त्वं, ततोऽर्थान्तरभूतानां द्रव्याणा-
मनुपलब्धेरित्यादिः ॥ २२ ॥

व्यवहारनयं प्रदर्शयन्ति—

संग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाभिसन्धिना क्रियते स व्यवहारः ॥ २३ ॥

संग्रहनयेन विषयीकृतानामर्थानां सत्त्वद्रव्यत्वादीनां विधानानन्तरमवहरणं—विभागो येनाभिप्रायविशेषेण क्रियते सोऽभिप्रायविशेषो व्यवहारनयः ॥ २३ ॥

यथा—यत् सत् तद् द्रव्यं पर्यायो वेत्यादिः ॥ २४ ॥

आदिपदेन अपरसंग्रहविषयीकृतार्थविषयव्यवहारोदाहरणं द्रष्टव्यम् । यद् द्रव्यं तद् जीवाजीवादिभेदेन षट्प्रकारम् । यः पर्यायः स द्विविधः । सुख-दुःखादिरूपः क्रमभावी, विज्ञानव्यक्तिशक्त्यादिरूपः सहभावी च । एवं यो जीवः स मुक्तः संसारी च । यः क्रमभावी पर्यायः स क्रियारूपोऽक्रियारूपश्चेत्यादि ॥ २४ ॥

यः पुनरपारमार्थिकद्रव्यपर्यायविभागमभिप्रैति स व्यवहाराभासः ॥ २५ ॥

योऽभिप्रायविशेषो द्रव्य-पर्यायविभागमपारमार्थिकं-काल्पनिकं मन्यते स व्यवहाराऽऽभासः ॥ २५ ॥

यथा—चार्वाकदर्शनम् ॥ २६ ॥

चार्वाको हि वस्तुनो द्रव्य-पर्यायात्मकत्वं नाङ्गीकरोति, कि

१. वेत्यादि ख । २. °मार्थिकं द्रव्य° ख ।
३. बृहस्पतिप्रवर्तितं परलोकात्म-पुण्य-पाप-मोक्षनिषेधकं नास्तिकं मतम्

[illegible] चार्वाकदर्शनं भूतचतुष्टयात्मकं घट-पटादिरूपं पदार्थजातं [illegible] स्वीकरोति, पर्यायान् द्रव्यपर्यायविभागं काल्पनिकमिति । [illegible] चार्वाकदर्शनं व्यवहाराभासमिति भावः ॥ २६ ॥

[illegible] पर्यायार्थिकं प्ररूपयन्ति —

पर्यायार्थिकश्चतुर्धा—ऋजुसूत्रः, शब्दः, समभिरूढः, एवंभूतश्च ॥ २७ ॥

ऋजु—वर्तमानक्षणस्थायि पर्यायमात्रं प्राधान्यतः सूचयन्नभिप्राय ऋजुसूत्रः ॥ २८ ॥

ऋजु— [illegible] । [illegible] प्राधान्येन [illegible] ॥ २८ ॥

यथा—सुखविवर्तः सम्प्रत्यस्तीत्यादिः ॥ २९ ॥

[illegible] ॥ २९ ॥

सर्वथा द्रव्यापलापी तदाभासः ॥ ३० ॥

[illegible]

१ [illegible]

२ [illegible]

यथा—तथागतमतम् ॥ ३१ ॥

तथागतमतम्—बौद्धमतम्। बौद्धो हि प्रतिक्षणविनश्वरान् पर्यायानेव पारमार्थिकत्वेनाभ्युपगच्छति, प्रत्यभिज्ञादिप्रमाणसिद्धं त्रिकालस्थायि तदाधारभूतं द्रव्यं तु तिरस्कुरुते इत्येतन्मतमृजुसूत्राभासत्वेनोपन्यस्तम् ॥ ३१ ॥

कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः ॥ ३२ ॥

कालादिभेदेन — काल-कारक-लिङ्ग-संख्या-पुरुषोपसर्गभेदेन, ध्वनेः—शब्दस्य अर्थभेदं प्रतिपद्यमानोऽभिप्रायविशेषः शब्दनयः ॥ ३२ ॥

यथा—बभूव भवति भविष्यति सुमेरुरित्यादिः ॥ ३३ ॥

यद्यपि सुमेरोर्द्रव्यरूपतयाऽभिन्नत्वात् पर्यायरूपतया च भिन्नत्वाद् भिन्नाभिन्नत्वं वर्तते, तथाऽपि शब्दनयो विद्यमानमपि कनकाचलस्य द्रव्यरूपतयाऽभेदमुपेक्ष्य केवलं भूत-वर्तमान-भविष्यल्लक्षणकालत्रयभेदाद् भेदमेवावलम्बते। आदिपदेन 'करोति क्रियते कुम्भः' इति कारकभेदे। 'तटस्तटी तटम्' इति लिङ्गभेदे। 'दाराः कलत्रम्' इति संख्याभेदे। 'एहि मन्ये रथेन यास्यति, नहि यास्यसि, यातस्ते पिता' इति पुरुषभेदे। 'सन्तिष्ठते, उपतिष्ठते' इत्युपसर्गभेदेऽप्यर्थस्य भिन्नत्वं स्वीकरोति ॥ ३३ ॥

तद्भेदेन तस्य तमेव समर्थयमानस्तदाभासः ॥ ३४ ॥

[illegible] — [illegible], [illegible] — [illegible], [illegible] — अर्थेत्यैव, सम-[illegible] । [illegible] [illegible] ॥ ३४ ॥

यथा—[illegible] भवति गच्छन्ति चूर्णकत्वादयो निम-[illegible] निमित्तार्थनिर्देशे, [illegible] [illegible] ॥ ३५ ॥

[illegible] ॥ ३५ ॥

[illegible] ॥ ३६ ॥

[illegible] ॥ ३६ ॥

[illegible] ॥ ३७ ॥

[illegible] ॥ ३७ ॥

[illegible]

अयमर्थः—यद्यपि इन्द्र-शक्रादयः शब्दा इन्द्रत्व-शक्रत्वादिपर्याय-विशिष्टस्यार्थस्य वाचकाः, न केवलं पर्यायस्य, तथापि समभिरूढनय-वादी गौणत्वाद् द्रव्यवाचकत्वमुपेक्ष्य प्रधानत्वात् पर्यायवाचकत्वमेवा-ङ्गीकुर्वन् 'इन्द्रादयः शब्दाः प्रतिपर्यायबोधकत्वाद्, भिन्नभिन्नार्थ-वाचकाः' इति मन्यते। शब्दनयो हि नानापर्यायभेदेऽप्यर्थाभेदमेवाभि-प्रैति, समभिरूढस्तु पर्यायभेदे अर्थभेदं प्रतिपद्यते इति विशेषः ॥ ३७ ॥

पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकुर्वाण-स्तदाभासः ॥ ३८ ॥

यः पर्यायशब्दानामभिधेयनानात्वमेवाभिप्रैति एकार्थाभिधेयत्वं पुनरमुष्य सर्वथा तिरस्कुरुते स तदाभासः समभिरुढाऽऽभासः ॥ ३८ ॥

यथा—इन्द्रः, शक्रः, पुरन्दरः इत्यादयः शब्दा भिन्नाभिधेया एव, भिन्नशब्दत्वात्, करि-कुरङ्ग-तुरङ्गशब्दवदित्यादिः[2] ॥३९॥

शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाऽऽविष्टमर्थं[3] वाच्यत्वेनाभ्युपगच्छन्नेवंभूतः ॥४०॥

शब्दानाम्—इन्द्रादिशब्दानां स्वप्रवृत्तिनिमित्तीभूतक्रियाऽऽविष्ट-मर्थं—इन्द्रादिशब्दप्रवृत्तौ निमित्तीभूता या इन्दनादिक्रिया तद्विशिष्टमर्थं यो वाच्यत्वेनाभ्युपगच्छति, क्रियाऽनाविष्टं तु उपेक्षते स एवंभूतः। अयं

१. "इदु परमैश्वर्ये, शक्लृंट् शक्तौ" हैमधातुपाठः।—सं०
२. °कुरङ्गशब्दवदित्यादि क ।
३. °क्रियाविशिष्टमर्थं ख ।

हि इन्दनादिक्रियाविशिष्टमर्थं तत्क्रियाकाले इन्द्रादिशब्दवाच्यत्वमभि-मन्यते । समभिरूढस्तु इन्दनादिक्रियायां विद्यमानायामविद्यमानायां च इन्द्रादिशब्दवाच्यत्वमभ्युपैतीति इत्यनयोर्भेदः ॥ ४० ॥

यथेन्दनमनुभवन्निन्द्रः, शकनक्रियापरिणतः शक्रः, पूर्दारणप्रवृत्तः पुरन्दर इत्युच्यते ॥ ४१ ॥

क्रियाऽनाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपंस्तु तदाभासः ॥ ४२ ॥

[illegible] क्रियाऽऽविष्टमेवार्थं वाच्यत्वेनाभ्युपगच्छति क्रियाना-विष्टं तु सर्वथा नाङ्गीकरोति स एवम्भूतनयाभासः ॥ ४२ ॥

यथा-विशिष्टचेष्टाशून्यं घटाख्यं वस्तु न घटशब्द-वाच्यं, घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्य-त्वात्, पटवदित्यादिः ॥ ४३ ॥

[illegible]—[illegible] विशिष्टचेष्टाशून्यत्वात् घटशब्दस्य [illegible] घटशब्दवाच्यो न भवतीति, घटशब्दप्रवृत्ति-निमित्तभूता [illegible] क्रिया [illegible]त्वात्, पटवत् । यथा-पटो [illegible], घटशब्दवाच्यो न भवति, तथैव चेष्टाशून्यो [illegible] घटशब्दवाच्यो न भवति ॥ ४३ ॥

१ "[illegible]" इति टिप्-पणिका ।

२. [illegible] । ३. [illegible] ।

एतेषु चत्वारः प्रथमे, अर्थनिरूपणप्रवणत्वादर्थ-नयाः ॥ ४४ ॥

एतेषु-नैगमादिषु सप्तसु नयेषु । प्रथमे-आद्याः ॥ ४४ ॥

शेषास्तु त्रयः शब्दवाच्यार्थगोचरतया शब्दनयाः ॥ ४५ ॥

पूर्वः पूर्वो नयः प्रचुरगोचरः, परः परस्तु परि-मितविषयः ॥ ४६ ॥

प्रचुरगोचरः—अधिकविषयावगाही ॥ ४६ ॥

सन्मात्रगोचरात् संग्रहाद् नैगमो भावाभावभूमि-कत्वाद् भूमविषयः ॥ ४७ ॥

संग्रहनयो हि सन्मात्रविषयत्वाद् भावावगाह्येव, नैगमस्तु भावा-भावविषयत्वादुभयावगाहीति बहुविषयः ॥ ४७ ॥

सद्विशेषप्रकाशकाद् व्यवहारतः संग्रहः समस्त-सत्समूहोपदर्शकत्वाद् बहुविषयः ॥४८॥

व्यवहारो हि कतिपयान् सत्त्वविशिष्टान् पदार्थान् प्रकाशयतीत्यल्पविषयः, संग्रहस्तु समस्तं सद्विशिष्टं वस्तु प्रकाशयतीति भूमविषयः ॥ ४८ ॥

वर्तमानविषयादृजुसूत्राद् व्यवहारस्त्रिकालविषयाव-लम्बित्वादनल्पार्थः ॥ ४९ ॥

---

१. शेषास्त्रयः ख

[illegible] ॥ [illegible] ॥

[illegible] ॥ ५० ॥

[illegible]

[illegible] ॥ ५१ ॥

[illegible] ॥ [illegible] ॥

[illegible]

[illegible] ॥ ५३ ॥

[illegible]

यथा प्रमाणवाक्यं विधि-प्रतिषेधाभ्यां प्रवर्तमानं सप्तभङ्गीमनुगच्छति, तथैव नयवाक्यमपि स्वविषये—स्वप्रतिपाद्ये प्रवर्तमानं विधिप्रतिषेधाभ्यां—परस्परविभिन्नार्थनययुग्मसमुत्थविधि-निषेधाभ्यां कृत्वा सप्तभङ्गीत्वमनुगच्छति ॥ ५३ ॥

प्रमाणवदस्य फलं व्यवस्थापनीयम् ॥ ५४ ॥

अयमर्थः—यथा प्रमाणात् प्रमाणफलं भिन्नाऽभिन्नं, तथैव नयान्नयफलमपि भिन्नाऽभिन्नमेव । यथा प्रमाणस्याऽऽनन्तर्येण फलं वस्त्वज्ञाननिवृत्तिः, तथैव नयस्यापि वस्त्वंशाज्ञाननिवृत्तिः फलम् । यथा प्रमाणस्य पारम्पर्येण हानोपादानोपेक्षाबुद्धयः फलं, तथा नयस्यापि वस्त्वंशविषयकहानोपादानोपेक्षाबुद्धयः फलमिति प्रमाणवन्नयस्यापि फलं व्यवस्थापनीयम् ॥ ५४ ॥

प्रमाता प्रत्यक्षादिप्रसिद्ध आत्मा ॥ ५५ ॥

'प्रत्यक्षादि' इत्यत्राऽऽदिपदेन अनुमानादीनां संग्रहः । तत्र प्रत्यक्षेण तावद् 'अहं सुखी' 'अहं दुःखी' इत्यादिप्रतीत्या सुखाद्याधारतयाऽहंप्रत्ययगोचरः शरीरादिविलक्षण आत्मा सिध्यति । अनुमानेन यथा—चैतन्यं तन्वादिविलक्षणाऽऽश्रयाश्रितम्, तत्र (शरीरादिषु) बाधकोपपत्तौ सत्यां कार्यत्वान्यथाऽनुपपत्तेः । न तावदयं हेतुर्विशेष्याऽसिद्धः,

---

प्रार्थ्यन्ते मया यत्ते नयसप्तभङ्गीवचनविधिं स्पष्टतया प्रकाशयेयुः । "स्यात्" "एव" इत्यनयोः प्रयोगो नयसप्तभङ्ग्यां विधेयो न वा ? विधेयश्चेत् को विशेषस्तर्हि प्रमाणनयसप्तभङ्गवचनप्रकारयोः ? न चेद् विधेयस्तदा कया युक्त्या ? कस्माद् वा प्रमाणात् ? इत्यादीनि शङ्कास्थानान्यवश्यं समाधेयानि समाहितबुद्धिभिः । –सं०

[illegible]

॥ ५५ ॥

[illegible] ॥ ५६ ॥

[illegible]

॥ ५७ ॥

[illegible]

तस्योपात्तपुंस्त्रीशरीरस्य सम्यग्ज्ञान-क्रियाभ्यां कृत्स्नकर्मक्षयस्वरूपा सिद्धिः ॥ ५७ ॥

तस्य-निर्दिष्टस्वरूपस्याऽऽत्मनः, उपात्तपुंस्त्रीशरीरस्य गृहीतपुरुष-स्त्रीशरीरस्य । इदं विशेषणं स्त्रीनिर्वाणद्वेषिणां दिगम्बराणां मतमत्य-सितुं, नपुंसकस्य मोक्षाऽभावज्ञापनार्थं च । "सम्यग्ज्ञान-क्रियाभ्याम्" इतिद्वन्द्वेन सम्यग्ज्ञान-क्रिययोः समुचित्य कारणत्वं प्रत्येकस्येति प्रदर्शि-तम् । सम्यग्ज्ञानपदेनैव सम्यग्दर्शनस्यापि प्राप्तत्वात् पृथक्त्वेन न निदर्शितम् । ज्ञान-क्रिययोः सम्यक्त्वविशेषणप्रदानेन मिथ्याज्ञानपूर्वि-कायाः कन्दमूलादिभक्षणरूपाया वा क्रियाया मोक्षकारणत्वं निरस्तं भवति । "कृत्स्नकर्मक्षयस्वरूपा सिद्धिः" इत्यनेन नैयायिकाभिमत-ज्ञानादिगुणोच्छेदरूपायाः सिद्धेर्निरासः ॥ ५७ ॥

इति बालबोधिन्याख्यया टिप्पण्या विभूषिते श्रीवादिदेव-सूरिसंदृब्धे श्रीप्रमाणनयतत्त्वाऽऽलोके नयतदाभासाऽऽत्मस्वरूपनिर्णायको नाम सप्तमः परिच्छेदः ।

---

१. किञ्चित्कर्मविशेषेऽपि मोक्षो न भवितुमर्हतीत्यर्थमवलम्ब्य लिखितो मदीयः श्लोक उदितः—

"तृष्णासमाप्तिर्जगतां भवेद् यदि शुष्यन्ति हेतुं च विनैव सागराः ।
सदागतिश्चेत् स्थिरतां भजेत् सदा मोक्षस्तदा कर्मविनाशनाद् विना ॥"

—सं०

अयं च द्वेधा–स्वात्मनि परत्र च ॥ ५ ॥

'अयं च–तत्त्वनिर्णिनीषुः, द्वेधा–द्विप्रकारः, स्वाऽऽत्मनि परत्र च। कश्चित् तत्त्वेषु सन्देहात् स्वात्मनि तत्त्वनिर्णयमिच्छति, कश्चित् तु परोपकारैकपरायणतया परत्र-अन्याऽऽत्मनि तत्त्वानिर्णयमभिकाङ्क्षतीति ॥५॥

आद्यः शिष्यादिः ॥ ६ ॥

आद्यः—स्वात्मनि तत्त्वनिर्णिनीषुः शिष्यादिः । आदिपदेन मित्रादयो ग्राह्याः ॥ ६ ॥

द्वितीयो गुर्वादिः ॥ ७ ॥

द्वितीयः—परत्र तत्त्वनिर्णिनीषुः ॥ ७ ॥

अयं द्विविधः—क्षायोपशमिकज्ञानशाली केवली च ॥ ८ ॥

अयं परत्र तत्त्वनिर्णिनीषुर्गुर्वादिः, द्विविधः–द्विप्रकारः । ज्ञानावरणीयस्य कर्मणः क्षयोपशमेनोत्पन्नं यत् मति-श्रुतावधि–मनःपर्यायरूपं ज्ञानं यस्यास्ति स क्षायोपशमिक ज्ञानशाली, एकः । ज्ञानावरणीस्य कर्मणः क्षयेणोत्पन्नं यत् केवलज्ञानं तद्वान् केवली, द्वितीयः । तदेवं चत्वारः प्रारम्भका वादिनः–१ जिगीषुः, २ स्वात्मनि तत्त्वनिर्णिनीषुः, ३ परत्र तत्त्वनिर्णिनीषुक्षायोपशमज्ञानशाली, ४ परत्र तत्त्वनिर्णिनीषुकेवली चेति ॥ ८ ॥

एतेन प्रत्यारम्भकोऽपि व्याख्यातः ॥ ९ ॥

एतेन–प्रारम्भकभेदप्रभेदप्रतिपादनेन, प्रत्यारम्भकोऽपि व्याख्यातः–प्रतिवादिनोऽपि भेद-प्रभेदा वर्णिता एवेत्यर्थः ।

एवं च प्रत्यारम्भकस्यापि, १ जिगीषुः, २ स्वात्मनि तत्त्व-

निरूपितेति । ३ अत्र सर्वनिरूपितत्वोपलक्षणविधयान्वयः, ४ अत्र
सर्वनिरूपितत्वविशिष्टो [illegible] एते [illegible] भेदाः । तत्र [illegible]
[illegible] भेदाः [illegible], यथा—

१ निरूपितः निरूपितत्वम्,

२ सकलेषु सर्वनिरूपितत्वम्,

३ अत्र सर्वनिरूपितत्वोपलक्षणमात्रविधया,

४ अत्र सर्वनिरूपितत्वविशिष्टा इति च भेदाः ।

एवं सकलेषु सर्वनिरूपितत्वे,

५ निरूपितत्वम्,

६ सकलेषु सर्वनिरूपितत्वम्,

७ अत्र सर्वनिरूपितत्वोपलक्षणमात्रविधया,

८ अत्र सर्वनिरूपितत्वविशिष्टा इति च भेदाः । एतेषु अत्र

[illegible]

१ निरूपितः सकलेषु सर्वनिरूपितत्वम् [illegible] ।

२ सकलेषु सर्वनिरूपितत्वम्,

३ सकलेषु सर्वनिरूपितत्वम्,

४ केचित् [illegible] सकलेषु सर्वनिरूपितत्वम्,

[illegible]

एवं प्रथम-तृतीय-[illegible] [illegible]

[illegible]

[illegible] ॥१॥

अयमर्थः—तत्र चतुर्षु प्रारम्भकेषु वादिषु मध्ये यदा जिगीषुः प्रारम्भको वादी भवति, एवं जिगीषुः, परत्र तत्त्वनिर्णिनीषुक्षायोपशमज्ञानशाली, परत्र तत्त्वनिर्णिनीषुकेवली वा प्रतिवादी भवति तदा वादि-प्रतिवादि-सभ्य-सभापतिलक्षणश्चतुरङ्ग एव वादो भवति। एषु अन्यतमस्याप्यपाये-अभावे सति जय-पराजयव्यवस्था एव न स्यात्, वादिनो जिगीषुत्वेन शाठ्यकलहादिसम्भवात् ॥ १० ॥

द्वितीये तृतीयस्य कदाचिद् द्व्यङ्गः कदाचित् त्र्यङ्गः ॥ ११ ॥

द्वितीये—स्वात्मनि तत्त्वनिर्णिनीषौ वादिनि सति, तृतीयस्य परत्र तत्त्वनिर्णिनीषुक्षायोपशमज्ञानशालिनः, कदाचिद् द्व्यङ्गः—द्वे वादि-प्रतिवादिलक्षणे अङ्गे यस्य स द्व्यङ्गो वादो भवति। कदाचित् त्र्यङ्गः—वादि-प्रतिवादि-सभ्यलक्षणस्त्र्यङ्गो वा वादो भवति।

अयमर्थः—यदा परत्र तत्त्वनिर्णिषुक्षायोपशमज्ञानशाली प्रतिवादी स्वयमेव वादिनि जय-पराजयनिरपेक्षतया तत्त्वनिर्णयं कर्तुं समर्थः, तदा इतरस्य सभ्य-सभापतिरूपस्याङ्गद्वयस्याभावाद् द्व्यङ्ग एव वादो भवति। यदा तु कृतप्रयत्नेनापि प्रतिवादिना वादिनि तत्त्वनिर्णयो न कर्तुं शक्यते तदा तन्निर्णयार्थं सभ्यानामपेक्ष्यमाणत्वात् त्र्यङ्गो वादो भवति। स्वपरोपकारायैव प्रवृत्तयोरनयोः शाठ्यकलहाऽद्यसम्भवेन सभापतेरनपेक्षणीयत्वादिति भावः ॥ ११ ॥

तत्रैव द्व्यङ्गस्तुरीयस्य ॥ १२ ॥

तत्रैव—स्वात्मनि तत्त्वनिर्णिनीषौ वादिनि सति, तुरीयस्य परत्र

[illegible] ॥ १२ ॥

तृतीये प्रथमादीनां यथायोगं पूर्ववत् ॥ १३ ॥

[illegible] ॥ १३ ॥

तुर्ये प्रथमादीनामेवम् ॥ १४ ॥

[illegible] यथोक्तम्—

"[illegible] ॥"

[illegible] ॥ १४ ॥

[illegible] ॥ १५ ॥

[illegible] ॥ १५ ॥

[illegible] ॥ १६ ॥

[illegible] ॥ १६ ॥

[illegible] ॥ १७ ॥

अयमर्थः—तत्र चतुर्षु प्रारम्भकेषु वादिषु मध्ये यदा जिगीषुः प्रारम्भको वादी भवति, एवं जिगीषुः, परत्र तत्त्वनिर्णिषुक्षायोपशमज्ञानशाली, परत्र तत्त्वनिर्णिनीषुकेवली वा प्रतिवादी भवति तदा वादि-प्रतिवादि-सभ्य-सभापतिलक्षणश्चतुरङ्ग एव वादो भवति। एषु अन्यतमस्याप्यपाये-अभावे सति जय-पराजयव्यवस्था एव न स्यात्, वादिनो जिगीषुत्वेन शाठ्यकलहादिसम्भवात् ॥ १० ॥

द्वितीये तृतीयस्य कदाचिद् द्व्यङ्गः कदाचित् त्र्यङ्गः ॥ ११ ॥

द्वितीये—स्वात्मनि तत्त्वनिर्णिनीषौ वादिनि सति, तृतीयस्य परत्र तत्त्वनिर्णिनीषुक्षायोपशमज्ञानशालिनः, कदाचिद् द्व्यङ्गः—द्वे वादि-प्रतिवादिलक्षणे अङ्गे यस्य स द्व्यङ्गो वादो भवति। कदाचित् त्र्यङ्गः—वादि-प्रतिवादि-सभ्यलक्षणस्त्र्यङ्गो वा वादो भवति।

अयमर्थः—यदा परत्र तत्त्वनिर्णिषुक्षायोपशमज्ञानशाली प्रतिवादी स्वयमेव वादिनि जय-पराजयनिरपेक्षतया तत्त्वनिर्णयं कर्तुं समर्थः, तदा इतरस्य सभ्य-सभापतिरूपस्याङ्गद्वयस्याभावाद् द्व्यङ्ग एव वादो भवति। यदा तु कृतप्रयत्नेनापि प्रतिवादिना वादिनि तत्त्वनिर्णयो न कर्तुं शक्यते तदा तन्निर्णयार्थं सभ्यानामपेक्ष्यमाणत्वात् त्र्यङ्गो वादो भवति। स्वपरोपकारायैव प्रवृत्तयोरनयोः शाठ्यकलहाऽऽद्यसम्भवेन सभापतेरनपेक्षणीयत्वादिति भावः ॥ ११ ॥

तत्रैव द्व्यङ्गस्तुरीयस्य ॥ १२ ॥

तत्रैव—स्वात्मनि तत्त्वनिर्णिनीषौ वादिनि सति, तुरीयस्य परत्र

[illegible] इत्यादि, [illegible] पादे [illegible] ॥ १२ ॥

तृतीये प्रथमादीनां यथायोगं पूर्ववत् ॥ १३ ॥

[illegible]

[illegible] ॥ १३ ॥

तुरीये प्रथमाद्यन्तेषु ॥ १४ ॥

[illegible] —

"[illegible]

[illegible] ॥"

[illegible] ॥ १४ ॥

[illegible] ॥ १५ ॥

[illegible]

[illegible] ॥ १५ ॥

[illegible] ॥ १६ ॥

[illegible] ॥ १६ ॥

[illegible]

[illegible] ॥ १७ ॥

वादिना स्वपक्षस्य स्थापनं प्रतिवादिपक्षस्य खण्डनं चेति द्वितयं कर्तव्यम् । एवं प्रतिवादिनापि स्वपक्षस्थापनं वादिपक्षप्रतिक्षेपश्चेति द्वयं कर्तव्यम् । अन्यतरस्याप्यभावे तत्त्वनिर्णय एव न स्यादिति भावः । तदुक्तम्—

"मानेन पक्ष-प्रतिपक्षयोः क्रमात् प्रसाधनक्षेपणकेलिकर्मठौ ।
वादेऽत्र मल्ल-प्रतिमल्लनीतितो वदन्ति वादि-प्रतिवादिनौ बुधाः ॥
॥ १७ ॥

वादिप्रतिवादिसिद्धान्ततत्त्वनदीष्णत्व-धारणाबाहुश्रुत्य-प्रतिभा-क्षान्ति-माध्यस्थ्यैरुभयाभिमताः सभ्याः ॥ १८ ॥

---

१. स्वपक्षस्थापनकाले वादिना साधनमुक्त्वा, संभाव्यमानतद्दोषोद्धारोऽपि स्वप्रौढत्वप्रदर्शनाय कार्यः । तथा चोक्तम्—

"स्वपक्षसिद्धये वादी साधनं प्रागुदीरयेत् ।
यदि प्रौढिः प्रिया तत्र दोषानपि तदुद्धरेत् ॥"

२. "दूषणं परपक्षस्य स्वपक्षस्य च साधनम् ।
प्रतिवादी द्वयं कुर्याद् भिन्नाऽभिन्नप्रयत्नतः ॥"

प्रतिवादिदत्तदोषेषु वादिहेतोर्विरुद्धहेत्वाभासत्वप्रदर्शनं मुख्यदोषः, तत्प्रदर्शनेन प्रतिवादी वादिनमवश्यं झटिति च जयतितराम् । तथा च कथितवान् दर्शनान्तरोद्भावितानेककलङ्को भट्टारकाकलङ्कः—

"विरुद्धं हेतुमुद्भाव्य वादिनं जयतीतरः ।
आभासान्तरमुद्भाव्य पक्षसिद्धिमपेक्षते ॥"

—संशोधकः मुनिहिमांशुविजयः ।

मध्यस्थत्वं—कुलीनत्वं, इति लक्षणम् ॥ १८ ॥

वादि-प्रतिवादिनोर्यथायोगं वादस्थानककथाविशेषाङ्गी-कारणाग्रवादोत्तरवादनिर्देशः, साधकबाधकोक्ति-गुणदोषावधारणं, यथावसरं तत्त्वप्रकाशनेन कथाविरमणं, यथासम्भवं सभायां कथा-फलकथनं चैषां कर्माणि ॥ १९ ॥

यदा वादि-प्रतिवादिनौ स्वयमनङ्गीकृतवादस्थानकनियमौ प्रवर्तेते तदा 'अस्यां [illegible] नियमेन [illegible] वादः कर्तव्यः' इत्येवं-[illegible] [illegible], 'अनेन प्रथमं वक्तव्यमनेन पश्चात्' इत्यग्रवादोत्तरवादनिर्देशः, वादि-प्रतिवादिभ्यामभिहितयोः साधकबाधक-[illegible] गुणदोषावधारणं, यदा एकेन प्रतिवादितमपि तत्त्वमन्येन [illegible], यदा वा द्वावपि [illegible] न विरमतः तदा तत्त्वप्रकाशनेन कथाविरमणं, जय-पराजयादिरूपं कथाफलकथनं चेत्येतानि सभ्यानां कर्माणि ॥ १९ ॥

प्रज्ञाऽऽज्ञैश्वर्य-क्षमा-माध्यस्थ्य-सम्पन्नः सभापतिः ॥ २० ॥

वादि-सभ्याभिहितावधारणकलहव्यपोहादिकं चास्य कर्म ॥ २१ ॥

१. [illegible] २. [illegible]

वादि-प्रतिवादिभ्यां सभ्यैश्च कथितस्यावधारणं, कलहनिराकरणम्, आदिना पारितोषिकवितरणादिकं चास्य सभापतेः कर्म-कर्तव्यम् ॥२१॥

सजिगीषुकेऽस्मिन् यावत्सभ्यापेक्षं स्फूर्तौ वक्तव्यम् ॥ २२ ॥

जिगीषुणा जिगीषुभ्यां जिगीषुभिर्वा सह वर्तत इति सजिगीषुकेऽस्मिन् वादे, यावत् सभ्या अपेक्षन्ते स्फूर्तौ सत्यां-प्रतिपादनोत्साहे सति, तावद् वक्तव्यम् ॥ २२ ॥

उभयोस्तत्त्वनिर्णिनीषुत्वे यावत्तत्त्वनिर्णयं यावत्स्फूर्ति च वाच्यम् ॥ २३ ॥

उभयोः—वादि-प्रतिवादिनोस्तत्त्वनिर्णिनीषुत्वे यावता तत्त्वनिर्णयो भवति तावत् स्फूर्तौ सत्यां वक्तव्यम्, अनिर्णये वा यावत्स्फुरति तावद्वक्तव्यम् ॥ २३ ॥

छात्राणामुपकाराय रामगोपालशर्मणा ।
वसु-सिध्यङ्क-भूम्यब्दे (१९८८) टिप्पणीयं विनिर्मिता ॥

इतिबालबोधिन्याख्यया टिप्पण्या विभूषिते श्रीवादिदेवसूरिसंदृब्धे प्रमाणनयतत्त्वाऽऽलोके वाद-वादि-सभ्य-सभापतिस्वरूपनिर्णायको नामाष्टमः परिच्छेदः,

[तत्समाप्तौ समाप्तोऽयं ग्रन्थः ।] ॥

शुद्धिपत्रकम् ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
७	१६	°त्वेनव	°त्वेनैव
१६	१९	°यमनिब°	°मनिब°
१८	१२	°काङ्क्षीण°	°काङ्क्षण°
१९	११	इत्यका°	इत्याका°
२२	२	°मलम्ब्यो°	°मवलम्ब्यो°
२२	५	°माथिकं	°मार्थिकं
३२	१०	खलु प्रक्ष°	खलु पक्ष°
३८	१८	हेताः सा°	हेतोः सा°
४२	१७	°रोत्तरसह°	°रोत्तरस्वरसह°
४४	१५	भवेत्ये°	भवत्ये°
४९	३	अत्र पति°	अत्र प्रति°
५६	६	°दादिदाष°	°दादिदोष°
५७	२१	°वत्त्वासिद्धेः	°वत्त्वसिद्धेः
५९	१४	वाक्प्रयागः	वाक्प्रयोगः
५९	१५	°जीवादा	°जीवादौ
६१	१६	°भावैरव	°भावैरेव
६८	७	°कमार्पि°	°क्रमार्पि°
९०	१६	ब्रते	ब्रूते
९७	२	साध्यधर्मे	साध्यधर्मो
१०९	१३	परसंग्रहमे°	परापरसंग्रहमे°
११९	१	°भङ्ग्योः	°भङ्ग्याः
१२१	१	°दिवत	°दिवत्
१२४	४	तत्त्वानि°	तत्त्वनि°
१२७	१३	°दरण	°दरेण